श्रीः

श्रीविश्वेश्वरभट्टप्रणीतं

निर्णयकौतुकम्

(रत्नमञ्जरीटीकाविभूषितम्)

सम्पादकः टीकाकारश्च

डा० जयकृष्णमिश्रः

श्रीविश्वेश्वर भट्टप्रणीतम्

निर्णयकौतुकम्

रत्नमञ्जरीटीकाविभूषितम्

सम्पादकः टीकाकारश्च

डॉ० जयकृष्णमिश्रः

धर्मशास्त्राचार्यः विद्यावारिधिः (Ph. D.)

प्रकाशक

श्री दामोदर मिश्रः

हरचण्डीसाहि, राजरणपुरम्

पुरी (उत्कलः)

प्रकाशकः
श्री दामोदर मिश्रः
हरचण्डीसाहि
राजरणपुरम्
पुरी (उत्कलः)

प्रथम संस्करण —५०० प्रतियाँ
१९८२

मूल्यम् : सप्तरूप्यकम् (७ रुपए)

मुद्रकः
श्री उपेन्द्र त्रिपाठी
शाकुन्तल मुद्रणालय
३४, बलरामपुरहाउस, इलाहाबाद-२

समर्पणम्

येषां महानुभावानां कृपया विद्यावारिधौ अवगाहनसौभाग्यं मया प्राप्तं, तेभ्यः परमकारुणिकेभ्यः निर्मलनिष्कपटन्याय-बुद्धिविशिष्टेभ्यः ज्ञाननिष्ठेभ्यः समेधमानसारस्वत-सुधासन्दोह धौतधीभ्यः परम श्रद्धास्पदवरेण्य

गुरुदेव-

पण्डित कुलमणिमिश्रशर्मभ्यः

सविनयं समर्पयामीदं

लघुपुष्पम्

FOREWORD

I am extremely happy to introduce the work *Nirnaya Kautukam* by Vishveshwar Bhatta, a small treatise belonging to the discipline of DharmaShastra, to the lovers of Sanskrit. The work deals with the various *Vratas* and *Parvans* observed by the Hindus in a cycle of one year. Its attention is mainly fixed on determining as to which Parvan should be observed on which day (Tithi) in conjunction with what constellation (Nakshatra) and under what planetory conditions. After a general discussion of all the *Tithis*, it goes over to the various months of the year and discusses the important Tithis of each month mentioning in short the religious ritual to be observed on that day.

The Hindus are famous since ancient times for a close observation of the celestial planetory conditions as well as for calculation of various time-units in accordance with the celestial phenomena. The practice goes back to the vedic times since the various rites of sacrifices were to be performed at a certain given moment. In fact, the development of astronomy and its recognition as a Vedānga owes its origin to the importance of the calculation of planetory movements for purpose of performing Vedic ritual.

The present treatise is very helpful in giving a description of the Hindu Vratas and festivals of a whole year in a most succinct and readable form. The author has consulted, as he himself mentions in the *Mangalacharana*, the works connected with the various schools of Dharma Shastras. He explicitly mentions the names of Chaturvarga-Chintamani, Kalamadhava, Samaya Mayukha, Smṛti Kaustubha, Madana Parijata and Nirnaya Sindhu. The last of these works was composed towards the first half of the 17th century which shows that our text is a comparatively recent work written most probably in the 18th century. The author seems to be a devotee of Lord Rāma since he pays his obeisance to 'जानकीजानि' in the first verse itself. The words 'महाशब्दोपनामकम्' in the first verse show that he was probably Maharashtriyan since the

family-name or title *Mahashabde* is common in Maharashtra. May be, he was a Maharashtriyan settled in Kashi like many hundred other Maharashtriya Sanskrit Scholars who migrated to Varanasi in the 15th and 16th century.

The edition of this work has been prepared on the basis of two manuscripts : one written in Oriya script on palmleaf and procured from the Orissa State Museum, Bhuvaneshwar and the other preserved in the manuscript Library of this Vidyapeetha which is written on paper in Devanagari script. Though no other manuscripts were available to the editor for preparing the text yet the reconstruction of the text appears to be faultless. The language of the work is simple and the treatment of the subject is lucid which makes the work not only readable but also interesting even to a layman.

This edition has been prepared by Dr. Jaya Krishna Mishra who has had a thorough training in Dharma Shastra to his credit by such authorities in this field as Pandit Kulamani Mishra. He has studied Dharma Shastra at the Sadashiv Kendriya Sanskrit Vidyapeetha, Puri (Formerly Sadashiv Sanskrit College) which has produced many outstanding scholars in the field of Dharma Shastra.

I congratulate Dr. Mishra for carrying out the task of editing this work so nicely and sincerely and hope that he shall devote himself even more to such academic persuits so that the Sanskrit world continues to get the fruits of his knowledge and academic labour in regular intervals.

Principal.

G. N. Jha Kendriya Sanskrit Vidyapeetha, **G. C. TRIPATHI**

A L L A H A B A D

22.10 1982

ग्रन्थमुखम्

हिन्दुधर्मस्य चरमोद्देश्यं पुरुषार्थचतुष्टयप्राप्तिः। अपौरूषेयस्य वेदस्यानुमापकतया स्मृत्यादीनामपि वेदानुकरणेन धर्मे प्राणाण्यात् धर्मशास्त्रमेव पुरुषार्थचतुष्टयस्य प्रमुखं प्रतिपादकम्। अतः निखिलधर्माचाराचरणभास्वरे भारते खण्डेऽद्यावधि परमकारूणिकैर्निगमागमपारावारपारीणैरनेकैर्महर्षिभिः स्मृत्यादयः विश्वसंसारवासिनां जनानामभ्युदयनिःश्रेयससिद्ध्यर्थं धर्मसेतुपालनाय च सादरं प्रणीताः सन्ति।

तत्र पुन महर्षिप्रणीतानां स्मृतिशास्त्राणां मध्ये कदाचिच्च समुपस्थितानां विषममतानामेकवाक्यताकरणाय भाष्यकाराः प्रयत्नं कृतवन्तः। पुनश्च देशकालादिधर्माणां व्यवहारसौकर्यार्थं विभिन्नेषु धर्मशास्त्रीयनिबन्धग्रन्थाः विरचिताः।

तत्र श्रुत्यनुमापकत्वेन प्रमाणीभूतस्य धर्मशास्त्रस्य निखिलाः विषयाः सामान्यत आचारव्यवहारप्रायश्चित्तरूपेषु त्रिधा विभज्यन्ते। तत्रापि आचारकाण्डेषु सर्वविधर्मोत्पादककर्मणां प्रतिपादनाद् धर्मशास्त्रे स एव मुख्यरूपं धारयति। पञ्चमहायज्ञेषु देवपूजैवान्तर्भूतत्वादाचारभागे एव व्रतोपवासादीनामन्तर्भावः क्रियते। तत्र पुनः देवपूजाया अर्वाचीनस्वरूपं मूर्त्तिपूजायामेवोपागतम्। अनन्तरं मनुष्याणां प्रवृत्तिभूता सा साकारपूजाऽपि समाहृता। तत्र पुनः साकारदेवानुद्दिश्य व्रतोपवासादीनामुत्पत्तिरभवत्। व्रतोपवासकरणे विशेषफलश्रवणात् तत्रैव मनुष्याणां निबिडा प्रवृत्तिरजायत। अतः पुराणेषु तदनुसारि धर्मशास्त्रीयनिबन्धग्रन्थेषु व्रतोपवासादीनां भूरि वर्णना प्राप्यते।

वैदिकव्रतानि लौकिकव्रतेभ्यः पृथक् भवन्ति। वैदिकव्रतानां फलमपूर्वफलं, स्वर्गप्राप्तिश्चासीत्। परन्तु लौकिकव्रतानां फलानि धनपुत्रायुरारोग्यादीनि। अतः ऐहिकफलहेतुत्वाल्लौकिकव्रतानां प्रसिद्धिरभवत्। सारल्यात्, लोकव्यवहारे प्रचलितत्वात, भोगसाधनत्वात्, मोक्षप्रदायकत्वाच्च लौकिकव्रतानां पालनं सर्वैः स्वीकृतम्। अतः आर्यजनसंस्कृतिसंरक्षणार्थमभिलाषपूरणार्थं च लौकिकव्रतानां महत्त्वमयधिकमिति मत्वा बहुधर्मशास्त्रनिबन्धकारैः व्रतसम्बन्धिनः

निबन्धग्रन्थाः प्रणीता। तेषु निबन्धकारेषु अमान्धकारे देदीप्यमानरत्नरूपोऽयं प्रख्यातविद्वान् विशिष्टं स्थानं बिभर्त्ति। अयं च महानुभावः "निर्णयकौतुकम्" नाम व्रतोपवासादीनां ग्राह्यकालनिर्णायकग्रन्थं प्रणीतवान्।

अयञ्च विश्वेश्वरः कदा कुत्र वाऽऽसीदिति संशयावहम्। स च ग्रन्थान्ते 'पौण्डरीकयाजि विश्वेश्वरविरचितं निर्णयकौतुकं समाप्तम्' इति कथयति। पुनश्च ग्रन्थमध्ये कतिपयेषु स्थलेषु "इति अस्मत् प्रपितामहाः श्रीरत्नाकरभट्टचरणाः' इति उद्धारयति। अतोऽयं विश्वेश्वरः भट्टान्वयजः आसीदिति निश्चीयते। धर्मशास्त्रसाहित्ये द्वौ विश्वेश्वरभट्टसंज्ञको दृष्टिपथारूढौ भवतः। तयोः प्रथमस्तु निर्णयसिन्धुकारकमलाकरभट्टस्य भ्रातुष्पुत्रः (दिनकरभट्टस्य पुत्रः विश्वेश्वरः भट्टः गागाभट्टः वा) आसीत्। परन्तु सोऽयं विश्वेश्वरः नेति निश्चीयते। यतः तस्यैव विश्वेश्वरस्य प्रपितामहः प्रसिद्धविद्वान् "नारायणभट्ट" इति स्पष्टं निर्णीतम्। एतेषां प्रपितामहस्तु रत्नाकरभट्ट इति प्रागेवास्माभिरुक्तम्। पुनश्चान्यः विश्वेश्वरभट्टः राज्ञः मदनपालस्याश्रयेण मदनपारिजातं नाम धर्मशास्त्रीयनिबन्धं विरचितवान्। परन्तु सोऽयं विश्वेश्वरः नेति प्रमाणीक्रियते, यतः सप्तदशशताब्द्युद्भवस्व कमलाकरस्य निर्णय-सिन्धुं वारम्बारमुद्धरतः विश्वेश्वरस्य कालः कमलाकरात् पूर्वं चतुर्दशशताब्धां वा कथं सम्भवेत्? अतः नेदृशीशङ्का करणीया। पुनश्च महामहोपाध्याय-पो० वी०-काणे-महोदयानां धर्मशास्त्रस्येतिहास ग्रन्थे धर्मशास्त्रीयग्रन्थानां वर्णनप्रसङ्गे विश्वेश्वरकृत एकः निर्णयकौतुकग्रन्थः उद्धृत। स च रघुनन्दनेन (१५२०-१५७५ A. D) उद्धृत इति तत्र स्पष्टं प्रदर्शितम्। परन्तु नेदं प्रमाणं सिद्ध्यति यतः कमलाकरस्य (१६१०-१६४० A. D) निर्णयसिन्धुं न्यूनातिन्यूनं विंशतिवारमुद्धरतः विश्वेश्वरस्य कालः रघुनन्दनात् पूर्वं कथं वा सिद्ध्येत। अन्तिमेऽपि अस्माभिः प्राप्तस्य हस्तलिपेरन्ते—"संवत् १९०६ (१८४८ A. D) भाद्रकृष्णसप्तम्यां भृगौवासरे उमाकान्तेन लिखितमिति" लिपिकारः स्पष्टयति। अतः विश्वेश्वरस्य कालः स्पष्टमप्राप्तत्वात् पौर्वापर्येण १६४० A. D तः १८४८ A. D मध्ये एवास्माभिः निश्चीयते। अतः परं सुधीभिश्चोन्नेयस्तस्य कालः।

ग्रन्थेऽस्मिन् मनोरमपरिपाट्या अभिनवप्रणाल्या च पर्वोत्सवादीनां ग्राह्यकालः निरूपितः। तत्र 'तिथिनक्षत्रवारादयः पापपुण्ययोः साधनमिति' गार्ग्यवचनानुसारं सर्वेषु व्रतेषु पालनकालश्च दृष्टिपथारूढः भवति। अतोऽस्मिन् निर्णयकौतुकाख्ये ग्रन्थे मुख्यत्वेन तिथिपर्वोत्सवादीनां ग्राह्यकालश्चाभिनवशैल्या निर्णीतः। भारवेः पुनः "हितं मनोहारि च दुर्लभं वचः" इति वचनमक्षर-शोऽनुसृत्य केवलं सारभूतविषयाणामुपस्थापनमनेन महानुभावेन स्वग्रन्थे विहितम्।

प्रथमतः सामान्यतिथिनिर्णयश्चानेन कृतः। तत्र शुक्लकृष्णपक्षयोः प्रतिपदादि पौर्णमास्यमावा-स्यान्तानां तिथीनां ग्राह्यकालः सामान्येन निर्णीतः। अनन्तरं पुनः विशेषतिथिनिर्णयप्रसंगे द्वादशेषु

चैत्रादिफाल्गुनान्तेषु मासेषु घटितानां व्रतादीनां शास्त्रीयविचारैः सह ग्राह्यकालः निरूपितः। अनन्तरं पुनः विशेषेण ग्रहणसंक्रान्त्योः ग्राह्यकालः कृत्याकृत्यश्च एतैः महानुभावैः प्रदर्शितः। अन्ते पुण्यादीनां तिथीनां वर्णनं कृत्वा ग्रन्थं समापयति। अतः लघ्वाकाराकलितेऽप्यपि रत्नमञ्जरी टीकया विभूषितोऽयं निबन्धग्रन्थः सर्वेषां जनानां मनोहारि भविष्यति तथा समेषामुपयोगपटुर्भूयादित्यभिलष्यते।

ग्रन्थस्यास्य सम्पादनकर्मणि उत्साहदातॄणां विद्वद्वरेण्यानां सकलसद्गुणमण्डितानां श्रीमतां **डा० हरिहर झा** महोदयानां पदयुगलेषु अहं साष्टाङ्गप्रणाममात्रं निवेद्य तोषमनुभवामि। कर्मण्यस्मिन्न-मूल्यपरामर्शनिमित्तं विद्याविद्योतितान्तःकरणानां सरस्वतीसमाराधनव्यसनिनां विपश्चिदपश्चिमानां समेधमानसारस्वतसुधासन्दोहधौतधीनां प्राचार्यपदवीमलंकुर्वतां **डा० गयाचरण त्रिपाठी** महोदयानां चरणारविन्देषु विनम्रभक्तिपूतप्रणतिततयः विनिवेद्यन्ते। पुनश्च कर्मण्यस्मिन्प्रवर्त्तकानां मम सकलज्ञा-नराशेः जन्मदातॄणां निष्कपटनिर्मलन्यायबुद्धिविशिष्टानां पण्डितप्रवराणां कुलमणिमिश्रशर्मणां चरणाभिवन्दनं कामये।

अनन्तरञ्च बाह्याभ्यन्तरकर्मसु प्रोत्साहनदातॄणां ज्ञाननिष्ठानां कीर्त्तिपुषां **डा० गोपराजू रामा** महोदयानां समीपेऽपि अहं चिरकृतज्ञः।

अन्तिमेऽपि शीघ्रातिशीघ्रं मुद्रणयन्त्रमाध्यमेन नवीनरूपदातॄणां शाकुन्तलमुद्रणालयाध्यक्षानां **श्री उपेन्द्र त्रिपाठी** महोदयानां साधुकर्मनिष्ठानिमित्तञ्चाहं तेषां समीपे चिरऋणी भवामि।

पुस्तकसम्पादनकर्मणि ममाऽयं प्रथमः प्रयासः। मयि अद्यावधि बालत्वं वरीवर्त्तते। यथा बालः प्रारम्भे चलनकर्मणि पतनादिना बारंबारं बाधितेऽपि उत्साह-सत्त्वात् कर्मणः नापसरति, तथैव ममोत्साहवर्धननिमित्तमेव ग्रन्थसम्पादनकर्मणि प्रवृत्तोऽहम्। अतः विज्ञैः गूढान्वेषिभिरलषितानां समेषां विषयाणां समावेशः ग्रन्थेऽस्मिन् मया न कृतः, तथापि यथाशक्ति परिश्रमेण स्वक्षमतानुरूप-सुनिष्ठया च परिष्कृत्य सम्पादित इति सुधियां समक्षमुद्घोषयामि। ग्रन्थेऽस्मिन् पुनः यत्र कुत्र सम्भावितान् मानस्वभावसुलभान् भ्रमप्रमादादीन् सम्मार्ज्य सुतरां मां समुत्साह्यानुकम्पयेयुरिति सविनयं निवेदयामि।

इति भवतां विनिवेदनकः

जयकृष्णमिश्रः

विषयसूची

ॐ

निर्णयकौतुकम्

श्री गणेशाय नमः

[1]प्रणम्य जानकीजानिं महाशब्दोपनामकः ।
विश्वेश्वरः सुबालानामवबोधार्थमादरात् ॥१॥

[2]हेमाद्रिमाधवौ वीक्ष्य [3]मयूखं [4]कौस्तुभं तथा ।
[5]यत्नान्निर्णयसिन्धुं च [6]मदनं निर्णयामृतम् ॥२॥

ओम् नमः शिवाय

*

रत्नमञ्जरी टीका

१. सकलविघ्नपरिसमाप्तिकामः ग्रन्थकृत् श्रीभट्टविश्वेश्वरः स्वकीयनिर्णयकौतुकाभिधस्य ग्रन्थस्य यावतीयविघ्ननिवारणार्थं नमस्कारात्मकं मङ्गलश्लोकं ग्रन्थारम्भे निबध्नाति "प्रणम्य जानकीजातिमित्यादिना ।"

श्रीरामचन्द्रस्य भक्तप्रवरः श्रीविश्वेश्वरः न केवलं रामचन्द्रं न वा केवलं जानकीदेवीमभिवन्द्य तोषमनुभवति, परन्तु जानकीजातिमिति कथयित्वा रामचन्द्रसीतालक्ष्मणहनुमद्वादीन् सर्वान् रामचन्द्रान्वयान् सङ्केतयति । अनन्तरञ्च वस्तुनिर्देशार्थं धर्मशास्त्रज्ञानविरहितानां सुबोधनिमित्तं सादरमस्य धर्मशास्त्रीयनिबन्धग्रन्थस्य निबन्धनाभिप्रायं ज्ञापयति ।

२. द्वितीयश्लोके ग्रन्थनिबन्धनकारणं स्वरूपञ्च प्रतिपादयति हेमाद्रिमाधवावित्यादिना । हेमाद्रिमाधवौ-हेमाद्रेः विशालधर्मशास्त्रीयनिबन्धं चतुर्वर्गचिन्तामणिं तथा विद्यारण्यस्वामिनः माधवाचार्यस्य कालमाधवं च पुस्तकद्वयमिति भावः ।

३. मयूखं—नीलकण्ठभट्टस्य समयमयूखश्राद्धमयूखव्रतमयूखादीन् ।

४. कौस्तुभं—अनन्तदेवभट्टस्य स्मृतिकौस्तुभम् ।

५. निर्णयसिन्धुं—कमलाकरभट्टस्य निर्णयसिन्धुम् ।

६. मदनं—मदनसिंहस्य मदनपारिजातं नाम धर्मशास्त्रीयनिबन्धम् ।

कल्पद्रुमं च तिथ्यर्क कालतत्वविवेचनम् ।
[१]फक्किकाभिर्वितनुते लघुनिर्णयकौतुकम् ॥३॥

[२]तत्र तिथिः द्वेधा । शुद्धा विद्धा च । शुद्धा सम्पूर्णत्वान्निर्णयानर्हा । तिथ्यन्तरयुता विद्धा । वेधस्तु सायंप्रातस्त्रिमुहूर्त्तात्मकः । कैश्चिद् द्विमुहूर्त्तोऽप्युक्तः तिथिविशेषवेधस्तूपवासातिरिक्तः । यथा । "[३]भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम्" । सर्वा तिथिः स्वस्वकालव्यापिनी ग्राह्या । एकभक्ते मध्याह्नव्यापिनी । मध्याह्नश्चात्र [४]त्रेधाविभक्तदिनद्वितीयभाग इति हेमाद्रिः । [५]पञ्चधाविभक्तदिन तृतीयभाग इति माधवः । दिनद्वये तद् व्याप्तौ [६]हेमाद्रिमते—

"युग्माग्नीयुगभूतानां षण्मुन्योर्वसुरन्ध्रयोः ।
रुद्रेण द्वादशीयुक्ता चतुर्दश्या च पूर्णिमा ॥
प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलम् ।
एतद् व्यस्तं महादोषं हन्ति पुण्यं पुराकृतम् ॥"

इति युग्मवाक्यान्निर्णयः । [७]माधवमते तु पूर्वा । उभयदिने तद् व्याप्त्यभावे साम्येनैकदेशस्पर्शे च

रत्नमञ्जरी टीका

१. फक्किकया यथा घटितानां समस्तसंशयानां संक्षेपेणैव निराक्रियेत, तथैवास्मिन् निर्णयकौतुकाभिधाने धर्मशास्त्रीयनिबन्धे मया मितभाषयैव सर्वेषां निबन्धकाराणाञ्च मतान्युपन्यस्य सिद्धान्तितम् । लघुशब्दश्चात्र ग्रन्थस्य कृशताप्रदर्शनपरं, न तु विषयन्यूनतापरमिति ध्येयम् ।

२ तत्र ग्रन्थस्य विषयारम्भे तिथि-वार-नक्षत्र-योग-करणादिषु पञ्चाङ्गेषु तिथेर्मुख्यत्वात् सकलकर्मसु तिथिरेव व्यवहृतत्वात् सा तिथिः प्रथमतः निर्णीयते । तिथेः प्राशस्त्यं यथा लल्लेन (निर्णयसिन्धौ पृ० १२२)—तिथिः शरीरं तिथिरेव कारणं । तिथिः प्रमाणं तिथिरेव साधनम् । इति ।

३. राजमार्तण्डः (पृ० १०६) ।

४. पूर्वाह्णमध्याह्नापराह्णभेदैः विभक्तदिवसस्य द्वितीयभागरूपः ।

५. प्रातःसंगवमध्याह्नापराह्णसायाह्नेषु पञ्चधाविभक्तदिवसस्य तृतीयभागरूपः ।

६. हेमाद्रिः (काल० पृ० ६७) ।

७. निर्णयसिन्धुः (पृ० १५) ।

पूर्वा । वैषम्येणैकदेशव्याप्तावधिक तद् व्यापिनी । [१]नक्तव्रते प्रदोषव्यापिनीतिथिर्ग्राह्या । दिनद्वये तद् व्याप्तावव्याप्तौ साम्येन वैषम्येण वा तदेकदेशस्पर्शे च परा ।

अथ प्रतिपत्

सा च शुक्लाऽपराह्णव्यापिनी ग्राह्या । तदभावे सायाह्नगेति [२]माधवः । कृष्णा तु परा । कृष्णापि [३]पूर्वैवेत्यनन्तभट्टाः । द्वितीया कृष्णा पूर्वा [४]शुक्लोत्तरा । केचित्तु सर्वाऽपि परैवेत्याहुः । तृतीया रंभातिरिक्ता परा । गौरीव्रते तु [५]कर्मकालव्यापिनीमपि त्यक्त्वा मुहूर्त्तमात्रापि परैव ।

घटिकामात्रापि परेति केचित् । कलाकाष्ठादिपरिमिताऽपि परेति कौस्तुभे । चतुर्थी परा । विनायकनागव्रतयोस्तु मध्याह्नव्यापिनी ग्राह्या । इयांस्त्वनयोर्व्रतयोर्विशेषः । विनायकव्रते परदिने एव मध्याह्नव्याप्तौ परा । पक्षान्तरेषु तृतीयाविद्धैव । नागव्रते तु पूर्वेद्युरेव मध्याह्नव्याप्तौ पूर्वा । अन्येषु सर्वपक्षेषूत्तरा । गौरीव्रते तु सर्वपक्षेषु पूर्वैव । पञ्चमी सर्वापि पूर्वैवेति माधवमदनरत्नादयः । हेमाद्रिस्तु कृष्णा पूर्वा शुक्लोत्तरेति । पक्षद्वयेऽपि पञ्चमी परैव, उपवासे तु पूर्वेति व्यवस्थाद्वयमुक्तवान् । षष्ठी स्कन्दव्रतातिरिक्ता [६]परैव । [७]सप्तमी सर्वाऽपि पूर्वा । अष्टमी कृष्णा पूर्वा शुक्लोत्तरा । शिवशक्त्युत्सवे तु [८]पक्षद्वयेऽपि परा । शक्तिपूजायां तु रात्रिव्यापिनी । दिनद्वये तद् व्याप्तावधिकरा

रत्नमञ्जरी टीका

१. नक्तव्रतस्य कालः बृहन्नारदीयेऽपि प्रतिपादितः (२७-१०) यथा—

प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।
उपोषितव्यं नक्षत्रे येनास्तं याति भास्करः ॥

२. निर्णयसिन्धुः (पृ० २३) ।

३. निर्णयसिन्धुः (पृ० २३) ।

४. द्वितीयायाः परविद्धात्वं यथा कृत्यकौमुद्यां नारदीयवचनम्—

पूर्वविद्धा न कर्त्तव्या द्वितीया षष्टिकैव च ।
अष्टम्येकादशी भूता धर्मकामार्थकांक्षिभिः ॥

५. पक्षोऽयं माधवेनाऽपि प्रशंसितः ॥ निर्णयसिन्धुः (पृ० २३) ।

६. कालविवेकः (पृ० ४४६) ।

७. सप्तम्याः पूर्वविद्धात्वं सौरपुराणेऽपि (५१-१०) प्रतिपादितम् ।

८. कालसारः (पृ० १४७), निर्णयसिन्धुः (पृ० २५) ।

त्रिव्यापिनी । तुल्यव्याप्तावुत्तरैव । नवमी सर्वापि [1]पूर्वैव । दशमी [2]माधवमते कृष्णा पूर्वा, शुक्लोत्तरा । [3]हेमाद्रिमते दिनद्वयेऽपि कर्मकालव्यापिनी पूर्वा परा वा । पक्षान्तरेषु तु पूर्वा। [4]निर्णयसिन्धौ तु सर्वाऽपि नवमीयुक्ता । तदलाभे औदयिकी ग्राह्येत्युक्तम् ।

अथैकादशी । तत्रादौ वैष्णवनिर्णयः—सूर्योदयात् पूर्वं मुहूर्त्तद्वयमध्ये दशम्यन्विता विद्धा। तदन्या शुद्धा। वैष्णवैः शुद्धोपोष्या, विद्धा तु सर्वथा त्याज्या । शुद्धाप्येकादशीमात्रस्य द्वादशीमात्रस्योभयोर्वा परत्र सत्त्वे त्याज्या ।

अथ स्मार्त्तानां सूर्योदये दशमी सद्भात्रे विद्धा, अन्यथा शुद्धा । तत्र शुद्धा न्यूनसमाधिकभेदेन प्रत्येकं त्रिविधा । एवं नवभेदाः । विद्धाप्येवम् । एवमष्टादशभेदाः । यथा (१) शुद्ध-न्यूनान्यूनद्वादशिका (२) शुद्धन्यूनासमद्वादशिका (३) शुद्ध न्यूनाधिकद्वादशिका (४) शुद्धसमान्यूनद्वादशिका (५) शुद्धा समासमद्वादशिका (६) शुद्धसमाधिकद्वादशिका (७) शुद्धाधिकान्यूनद्वादशिका (८) शुद्धाधिकासमद्वादशिका (९) शुद्धाधिकाधिकद्वादशिका एवं (१०) विद्धन्यूनान्यूनद्वादशिका (११) विद्धन्यूनासमद्वादशिका (१२) विद्धन्यूनाधिकद्वादशिका (१३) विद्धसमान्यूनद्वादशिका (१४) विद्धसमासमद्वादशिका (१५) विद्धसमाधिकद्वादशिका (१६) विद्धाधिकान्यूनद्वादशिका (१७) विद्धाधिकासमद्वादशिका (१८) विद्धाधिकाधिकद्वादशिका । इह न्यूनसमाधिकत्वानि सूर्योदयकालापेक्षया वेदितव्यानि । तत्र प्रथमद्वितीयचतुर्थपञ्चमभेदेषु विवाद एव नास्ति । तृतीयषट्पक्षयोः शुद्धैकादश्यामुपवासः । हेमाद्रिमते तु शुद्धद्वादश्याम् । एतद् वैष्णवविषयमिति निर्णयसिन्धौ । सप्तमाष्टमभेदयोः सकामानां गृहस्थानां च पूर्वा । निष्कामयतिविधवानां तु परा । विष्णुप्रीतिकामानां तूपवासद्वयम् । नवमपक्षे सर्वेषां परैव । दशमपक्षे पुत्रवद् गृहस्थव्यतिरिक्तानां सर्वेषां पूर्वा । तेषांमेव परा । एकादशपक्षे गृहिणां पूर्वा यतीनामुत्तरा । हेमाद्रिस्तु पुत्रवद् गृहिणां मुमुक्षुणां च परा, अन्येषां पूर्वविद्धैवेत्याह । मदनरत्नमते तु दशमैकादशपक्षयोर्मुमुक्षुभिन्नानां सर्वेषां पूर्वा । तेषामेवं परा । पुत्रिणां तु किञ्चिद् भक्षयित्वोपवासः । त्रयोदशचतुर्दशभेदयोर्गृहिणां पूर्वा, यतीनामुत्तरा । माधवस्तु दशमैकादशद्वादशत्रयोदशभेदेषु सर्वेषां पूर्वविद्धैवेत्याह । द्वादशपञ्चदशभेदयोः सर्वेषां शुद्धद्वादश्येव । निर्णयामृतमते तु

रत्नमञ्जरी टीका

१. निर्णयसिन्धुः (पृ० २५) ।

२. निर्णयसिन्धुः (पृ० २५) ।

३. निर्णयसिन्धुः (पृ० २५) ।

४. निर्णयसिन्धुः (पृ० २५) ।

द्वादशपक्षे सर्वेषां पूर्वा । मदनरत्नमते तु पञ्चदशभेदेषु मुमुक्षुभिन्नानां सर्वेषां पूर्वा । तेषामेव परा । षोडशभेदे सर्वेषां परा । पुत्रिभिस्तु नक्तं कार्यम् । हेमाद्रिस्तु मोक्षपापक्षयविष्णुसायुज्यकामिनां परा । पुत्रिणां त्वत्रैव नक्तम् । एतद्भिन्नानां तु विद्धैवेत्याह । सप्तदशपक्षे सर्वेषां परा । सर्वेषां पूर्वैवेति निर्णयसिन्धौ । माधवमयूखकारादयस्तु षोडशसप्तदशपक्षयोर्गृहिणां पूर्वा, यतीनामुत्तरेत्याहुः । अष्टादशपक्षे सर्वेषां परैव । वेधसन्देहे ज्योतिर्विद्भिः प्रतिपत्तौ वा परा ग्राह्येति कैश्चिदुक्तं, तद् वैष्णवविषयमिति निर्णयसिन्धौ । [1]एकादश्यां पित्रोः श्राद्धे सति तत् कृत्वा पितृयज्ञशेषमाजिघ्रेत् । द्वादशी यदाऽल्पा तदा माध्याह्निकीं क्रियामपकृष्य प्रातरेव पारणं कार्यम् । संकटे प्रदोषव्रतादौ [2]जलेन पारणं कर्त्तव्यम् । द्वादश्यां प्रथमपादो हरिवासरसंज्ञकस्तमतिक्रम्य पारणं कुर्यात् ।

अथाष्टौ [3]महाद्वादश्यः । तत्र चतस्रस्तिथिप्रयुक्ताश्चतस्रो नक्षत्रप्रयुक्ताः (१) शुद्धाधिकैकादशीयुता द्वादशी उन्मीलिनी (२) शुद्धाधिका द्वादशी व्यञ्जुली (३) सूर्योदये एकादशी, अन्ते त्रयोदशी, मध्ये वर्त्तमानद्वादशी त्रिस्पृशा (४) अग्रे पर्वणः सम्पूर्णाधिकत्वे पक्षवर्धिनी (५) पुष्ययुता जया (६) श्रवणेन विजया (७) पुनर्वसुना जयन्ती (८) रोहिण्या पापनाशिनी । नक्षत्रप्रयुक्तश्रवणद्वादशीभिन्नमहाद्वादशीत्रये सूर्योदयादारभ्य परसूर्योदयपर्यन्तं नक्षत्रयोगो मुख्यः कल्पः । सूर्योदयप्रभृत्यस्तपर्यन्तत्वमनुकल्पः । पारणा तूभयान्तेऽन्यतरान्ते वा । एकादशीद्वादश्योरेकत्वे तन्त्रेणोपवासः । पार्थक्ये तु शक्तस्योपवासद्वयम् । अशक्तस्य द्वादश्यामेव । एताः कालतत्त्वविवेचनादिमते काम्याः । कौस्तुभमते श्रवणद्वादशी-

---

रत्नमञ्जरी टीका

१. एकादश्यां श्राद्धे पाते कृत्यतत्त्वार्णवे (पृ० ११८) ऽपि स्मृतिवचनेन व्यवस्था विहिता यथा—

उपवासो यदा नित्यं श्राद्धं नैमित्तिकं भवेत् ।
उपवासं तदा कुर्यादाघ्राय पितृसेवितम् ॥

२. संकटादिषु जलपारणं कृत्यकौमुद्यामपि स्कन्दपुराणवचनं प्रदर्शितं यथा—

जलादिपारणं कुर्याद् यद्यनन्तरलङ्घनम् ।
अशक्तौ पारणस्यापि कुर्यादुदकपारणम् ॥
शक्तस्तु पारणं कुर्यान्नरोऽधमेण लिप्यते ।
पारयित्वोदकेनाऽपि भुञ्जानो नैव दुष्यति ।
अशिताऽनशिता यस्मादापो विद्वद्भिरीरिता ॥

३. एतासां द्वादशीनां निर्णयः निर्णयसिन्धा (पृ०-३५) वपि वर्त्तते । मूलं तु हेमाद्रावेव ।

भिन्नाः काम्याः । गोविन्दार्णवमते नित्यकाम्याः । द्वादशी तु पूर्वैव । त्रयोदशी शुक्ला[1]पूर्वा [2]कृष्णोत्तरा । प्रदोषव्रते तु प्रदोषव्यापिनी । प्रदोषश्चास्तोत्तरं घटिकात्रयम् । गौडमते तु घटीद्वयम् । क्वचित्तु त्रिमुहूर्त्तः प्रदोषः स्यादित्युक्तम् । तत्रान्यतरदिने तद् व्याप्तौ तत् स्पर्शे वा सैव ग्राह्या । दिनद्वये तद् व्याप्तौ साम्येन तदेकदेशस्पर्शे दिनद्वयेऽपि तदभावे वोत्तरा, वैषम्ये त्वधिका । [3]चतुर्दशी कृष्णा पूर्वा शुक्लोत्तरा । उपवासे सर्वाऽपि परैवेति [4]मदनरत्ने । अमापूर्णे तुलादानपितृदेव प्रीत्यर्थोपवासादौ परे ग्राह्ये । श्राद्धेऽमा येषां साग्निकानामन्वाधानपिण्डपितृयज्ञदर्शश्राद्धान्येक-दिनकर्त्तव्यत्वेन नियतानि । तैरंशतः साकल्येन वा त्रेधाविभक्तदिनतृतीयांशरूपापराह्ण-व्यापिनी पूर्वा परा वा ग्राह्या । पूर्वदिने कृत्स्नव्याप्तावुत्तरत्रैकदेशव्याप्तावपि पूर्वैव । यदि यजनीयदिने चन्द्रदर्शनादेकदेशव्याप्तिदिने यागः, यदा त्वेतस्मिन्नेव विषये वृद्धया चन्द्रादर्शनात् प्रतिपद्येव यागस्तदान्वाधानानुरोधेन श्राद्धमप्येकदेशव्याप्तिदिन एव । यात्वेकदेशमपि पुर्वेद्युरेव स्पृशति सा पूर्वैव । अतएव दिनद्वयेऽपि समैकदेशव्याप्तौ पूर्वा । उत्तरत्र कृत्स्नव्याप्तौ पूर्वत्रैकदेश व्याप्तौ उत्तरैव । दिनद्वये वैषम्येणैकदेशव्याप्तौ तदाधिक्यवती । तत्र पूर्वस्यास्तथात्वे सम्यगेव ।

यद्युत्तरत्र यागदिनगतचन्द्रादर्शनप्रयोजिकावृद्धिर्भवति तदोत्तरा । उत्तरस्यास्तथात्वे यत उत्तर-दिने चन्द्रदर्शनं न भवति तदोत्तरैव । अन्यथा पूर्वैव । या दिनद्वयेऽपि साम्येनैकदेशव्यापिनी, सा यदि क्षयेण तदा पूर्वा, यदि वृद्ध्या तदा परा । चन्द्रादर्शनतद्दर्शनप्रयुक्तस्तयोरपवादः पूर्ववदेव । यदि साम्येन, तदा यागदिने चन्द्रादर्शने परा, तद्दर्शने पूर्वा । आश्वलायनापस्तम्बैर्निरग्निकैरपि तु पञ्चधाविभक्तदिनचतुर्थभागापराह्णव्यापिन्यमा पूर्वा परा वा ग्राह्या । दिनद्वयेऽपि सकलापराह्ण-

---

रत्नमञ्जरी टीका

१. निर्णयसिन्धुः (पृ०-३६) ।

२. कृष्णत्रयोदश्याः परविद्धात्वं यथा कालविवेके (पृ०-४७६)—

> षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी ।
> एताः परयुताः पूज्याः परा पूर्वेण संयुताः ॥

३. चतुर्दशी तु सर्वमते कृष्णा पूर्वा, शुक्लोत्तरेति कमलाकरः । शुक्लचतुर्दश्याः परविद्धात्वं कृत्यकौमुद्यां शङ्करगीतावचनं यथा—

> अमावास्याष्टमी षष्ठी शुक्ला चैव चतुर्दशी ।
> एताः परयुताः कार्याः पराः पूर्वेण संयुताः ॥

४. निर्णयसिन्धुः (पृ०-३६) ।

व्याप्तावुत्तरतिथे वृद्धिसाम्ययोरुत्तरा । क्षये पूर्वा । वैषम्ये त्वधिका । दिनद्वयेऽपि साम्येनैकदेशव्याप्तौ तिथिसाम्ये वृद्धौ च परा । क्षये पूर्वा । दिनद्वयेऽप्यपराह्णास्पर्शे तु साग्नेश्चतुर्दशी युक्ता । अनग्न्यादीनां प्रतिपद्युक्ता । यागकालस्तु पर्वणश्चतुर्थभागः प्रतिपदाद्यभागत्रयश्च । तत्र मध्याह्नें तत्पूर्वं वा पर्वप्रतिपदोः सन्धौ तदहर्यागः । अत्राह्नो द्वेधाविभागः । मध्याह्नादूर्ध्वं सन्धौ परेऽह्नि यागः । [1]सन्धिज्ञानमाह कात्यायनः—

"परेऽह्नि घटिका न्यूनास्तथैवाभ्यधिकाश्च याः ।
तदर्द्धक्लृप्त्या पूर्वस्मिन् ह्रासवृद्धी प्रकल्पयेत् ।।" इति ।

संगवादूर्ध्वं मध्याह्नात् प्राग् यदि सन्धिस्सा पूर्णिमा सद्यः कालः । अमायां विशेषः—प्रतिपदि सायं द्वितीयायास्त्रिमुहूर्त्तस्पर्शे चतुर्दश्यामन्वाधानम् । [2]वाजसनेयिनां सन्धिदिनेऽन्वाधानम् । परेऽह्नि याग इति माधवः, नेति निर्णयसिन्धौ । तैत्तिरीयाणां चन्द्रदर्शनदिने यागः। एवं स्मार्त्तस्थालीपाकेऽपि । पिण्डपितृयज्ञस्तु कात्यायनानां यागदिनात् पूर्वदिने । आश्वलायनानां शेषपर्वणि । खण्डतिथौ पूर्वदिने श्राद्धं, परदिने पिण्डपितृयज्ञः । पार्वणश्राद्धेऽपराह्णव्यापिनीतिथिर्ग्राह्या । विवेचनकारादिमते तु पार्वणे कुतपापराह्णोभयव्यापिनी मुख्या । असम्भवे केवलापराह्णव्यापिन्य प्रपितामहचरणा अपि एवम् । दिनद्वयेऽपि समग्रापराह्णव्याप्तौ साम्येनैकदेशव्याप्तौ च पूर्वेति नि[3]र्णयसिन्धु-

---

रत्नमञ्जरी टीका

१. पौर्णमास्यां विशेषमाह कात्यायनः—
सन्धिश्चेत् संगवादूर्ध्वं प्राक् पर्यावर्त्तनाद्रवेः ।
सा पौर्णमासी विज्ञेया सद्यस्कालविधौ नरः ॥ (निर्णयसिन्धुः पृ-३७) ।

२. भिन्नशाखिनां श्राद्धकालः यथा धर्मसिन्धौ (पृ-५४) ।—
तत्राश्वलायनानां यस्मिन्नहोरात्रे अमावास्याप्रतिपदोः सन्धिस्तद्दिनापराह्णे पञ्चधाविभक्तदिनचतुर्थभागरूपे पिण्डपितृयज्ञः । आपस्तम्बहिरण्यकेशिमतानुसरिणामपि सन्धिदिने एव पितृयज्ञः । स चाऽपराह्णेऽधिवृक्षसूर्ये वा कार्यः ।
श्राद्धमञ्जर्यामपि (पृ-१४)—तत्र कात्यायनानां यागदिनात् पूर्वेद्युरेव पिण्डपितृयज्ञः । आपस्तम्बहिरण्यकेशीयादीनां पर्वसन्धिमदहोरात्रे मुहूर्त्तमात्रायामप्यमावास्यायां पिण्डपितृयज्ञः ।

३. निर्णयसिन्धुः (पृ-३९) ।

कारादयः। माधवमते तु परतिथेः क्षये पूर्वा, वृद्धौ परा। वैषम्येऽधिका। दिनद्वयेऽपि तत्सम्बन्धाभावे पूर्वा। एकोद्दिष्टे तु मध्याह्नव्यापिनी। निर्णयः पार्वणवत्।

इति सामान्यतिथिनिर्णयः

अथ विशेषतिथयो निर्णीयन्ते

तत्र चैत्रशुक्लप्रतिपदुदयव्यापिनी ग्राह्या। [1]दिनद्वये तद्व्याप्तावव्याप्तौ वा पूर्वा। अत्र तैलाभ्यङ्गो नित्यः। चैत्रस्य मलत्वे वत्सरारम्भप्रयुक्तं कर्म तत्रैव कार्यमिति नि[2]र्णयसिन्धुकृत्यरत्नावलीविधानपारिजातकारादयः। शुद्धे कार्यमिति मयूखे। नैमित्तिकं तैलाभ्यङ्गादिमले। काम्यं ब्रह्मपूजाशान्त्यादि शुद्धे इति कौस्तुभे। अस्यामेव नवरात्रारम्भः। तन्निर्णयो वक्ष्यते। चैत्रशुक्लतृतीयायां श्रीरामचन्द्रदोलोत्सवारम्भः। स च नित्यः। इयमेव गोरीव्रते मुहूर्त्तमात्रापि परा। शुद्धाधिकाप्युत्तरेति माधवः। सत्यपि वैधृत्यादियोगे द्वितीयानिषेध एव बलवान्। तस्य विशेषविषयत्वात्। इयमेव [3]सौभाग्यशयनव्रते परयुतैव। इयं मन्वादिः। मन्वादयश्चोक्ताः मात्स्ये—

"अश्वयुक् शुक्लनवमी द्वादशी कार्त्तिके सिता।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च॥
फाल्गुनस्य त्वमावास्या पौषस्यैकादशी सिता।
श्रावणस्याष्टमी कृष्णा तथाऽऽषाढ़स्य पूर्णिमा॥
आषाढ़े शुक्लदशमी तथा माघस्य सप्तमी।
कार्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी तथा।
मन्वन्तरादयस्त्वेता दत्तस्याक्षयकारकाः॥"

रत्नमञ्जरी टीका

१. निर्णयसिन्धुः (पृ-६१)।

२. निर्णयसिन्धुः (पृ-६१)।

३. निर्णयसिन्धुः (पृ-६२)।

४. एताः चतुर्दशाः मन्वाद्याः तिथयः यथाक्रमं चैत्रमासतः फाल्गुनपर्यन्तं ज्ञातव्याः। ताश्च तिथयः मूलपुस्तके सङ्केतिताः।

इति संग्रहे ।

"तिथ्यग्नी न तिथिस्तिथ्याशे कृष्णेभोऽनलो ग्रहः :
तिथ्यर्को न शिवोऽश्वोऽमातिथी [4]मन्वादयो मधोः ।।'

चै० १७/३, वै० ज्यै १५/, आ० १५/१०, श्रा० ८/, भा० ३/, आ० ९/, का० १५/१२, मा० पौ० ११/, मा० ७/, फा० ३०/१५/

इयमेव मत्स्यजयन्ती ।

"[1]मत्स्योऽभूद्धुतभुग्दिने मधुसिते कूर्मो विधौ माधवे,
वाराहो गिरिजासुते नभसि यद् भूते सिते माधवे ।
सिंहो भाद्रपदे सिते हरितिथौ श्रीवामनो माधवे,
रामो गौरितिथावतः परमभूद्रामो नवम्यां मधोः ।।
कृष्णोऽष्टम्यां नभसि सितपरे, चाश्विने यद्दशभ्यां बुद्धः ।
कल्की नभसि समभूच्छुक्लषष्ठ्यां क्रमेण ।।
अह्नो मध्ये वामनो रामरामौ, मत्स्यः क्रोडश्चापराह्णे विभागे ।
कूर्मः सिंहो बौद्धकल्की च सायं, कृष्णो रात्रौ कालसाम्ये च पूर्वा ।।"

इति पुराणसमुच्चयात् । चैत्रशुक्लाष्टभी [2]भवानीयात्रादौ परयुता ।

चैत्रशुक्लनवमी रामनवमी । इयं [3]मध्याह्नव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्तावव्याप्तावेकदेशस्पर्शे वा पुनर्वसुयुतामपि पूर्वां त्यक्त्वा परैवेति केचित् । सोनक्षत्रा चेत् पूर्वाऽन्यथोत्तरेति मयूखादौ । एषु पक्षेषु या पुनर्वसुयुता सैव ग्राह्येति तत्त्वविवेचनादौ । यदा तु दिनद्वयेऽपि पुनर्वसुयोगः, एकत्र मध्याह्ने परत्र मध्याह्नं विहाय तदा मध्याह्ने पुनर्वसुयुक्ता ग्राह्या । यदा तु दिनद्वयेऽपि नवमी पुनर्वसुयोगो यदा वा दिनद्वयेऽपि मध्याह्नं विहाय यदा वा दिनद्वयेऽपि पुनर्वस्वभावस्तदोत्तरा । सर्क्षापि अष्टमीविद्धा नोपोष्येति [4]माधवः । यदा तु प्रातस्त्रिमुहूर्त्ता नवमी, दशमी च क्षयवशात् सूर्योदयात्

रत्नमञ्जरी टीका

१. पुराणसमुच्चयवचनमिति निर्णयसिन्धौ (पृ-६३) ।
२. निर्णयसिन्धुः (पृ-६४) ।
३. निर्णयसिन्धुः (पृ-६४) ।
४. निर्णयसिन्धुः (पृ-६५) ।

प्रागेव समाप्यते तदा स्मार्त्तैरष्टमीविद्धाऽपि कार्या वैष्णवैस्तु नवम्यां मध्याह्नव्याप्त्यभावेऽपि षड्घटिकात्मिकैव ग्राह्या। दशमीवृद्ध्यभावेऽष्टमीविद्धायाः क्षये तु वैष्णवैरपि विद्धैवोपोष्या। ऋक्षाभावेऽपि नवम्यापोऽष्या। पारणा च दशम्यामेव। इयं मलमासे न कार्या। चैत्र शुक्लैकादश्यां दोलोत्सवः। चैत्रशुक्लद्वादश्यां दमनोत्सवः। स च नित्यः। अयं [1]मलमासे न कार्यः। शुक्रास्तादौ तु कार्य एव। चैत्रशुक्लचतुर्दशी दमनकारोपणकुलधर्मव्रतादौ रात्रिव्यापिनी ग्राह्या। रात्रियोगिनीत्येतत् पूर्वविद्धा परमिति मयूखे। नि[2]र्णयसिन्धौ तु पूर्वदिने सायं मुहूर्तत्रयवेधे पूर्वाऽन्यथोत्तरेति सम्प्रदायविन्मते स्थितम्। कौस्तुभे त्वपराह्णव्यापिनी पूर्वविद्धैवेत्युक्तम्। येषां दिवा दमनकार्पणकुलधार्मस्तैरपि रात्रियोगिनी, यत्र चतुर्दशी तत्र स कार्यः। चैत्रीपौर्णिमा सामान्यनिर्णयात् परैव।

इति चैत्रः

अथ वैशाखः

वैशाखशुक्लतृतीयाऽक्षय्यतृतीया। सा पूर्वाह्णव्यापिनी ग्राह्या। दिनद्वये तद्व्याप्तौ परा। चैत्रशुक्लतृतीयात आन्दोलनव्रते मासं या गौरी पूजिता, तस्याः विसर्जनेऽपीयं मुहूर्त्तमात्राप्युत्तरैव। इयं युगादिरपि।

"माघे पञ्चदशी कृष्णा नभस्ये च त्रयोदशी।
तृतीया माधवे शुक्ला नवम्युर्जे युगादयः।"

एता युगादयः पूर्वोक्तमन्वादयश्च शुक्लपक्षस्थाः पौर्वाह्णिक्यः। कृष्णपक्षस्थाप्यपराह्णिक्य इति [4]हेमाद्रिः। तन्मते श्राद्धेऽपि पूर्वाह्णव्यापिन्येव। दिनद्वये तत्त्वे परैवेयम्। उदयव्यापिन्य इति स्मृत्यर्थसारे। निर्णयामृतकालादर्शादौ तु श्राद्धे

रत्नमञ्जरी टीका

(१) अस्य दमनोत्सवस्य मलमासेऽकरणत्वप्रसङ्गमुपस्थापयति निर्णयसिन्धुकारोऽपि (पृ०-६८)—इदं च मलमासे न कार्यम्। "उपाकर्मोत्सर्जनं च पवित्रं दमनार्पणमिति कालादर्शे मलमासवर्ज्येषु परिगणनात्।

(२) निर्णयसिन्धुः (पृ—६८)।

(३) रत्नमालायामिति निर्णयसिन्धुः (पृ—७१)।

(४) निर्णयसिन्धुः (पृ—७२)।

एता अपराह्णव्यापिन्यः; स्नानादौ तूत्तरा एवेत्युक्तम् । एताश्च मलमासे सति तत्रैव कार्याः । श्राद्धं[1] तु मासद्वयेऽपि कार्यम् । इयं परशुरामजयन्ती । सा प्रदोषव्यापिनी । दिनद्वये तत्त्वे अंशतः समव्याप्तौ च पराऽन्यथा पूर्वैव । मध्याह्णव्यापिनीति केचित् । कौस्तुभे तु निशाप्रथमयामव्यापिनी मध्याह्णव्यापिनी वेयं ग्राह्या । उभयत्रापि पूर्वदिन एव । तद् व्याप्तौ पूर्वाऽन्यथा परैवेत्युक्तम् । रामकल्पद्रुमे तु मध्याह्नोत्पत्तिपक्षोऽयुक्त इत्युक्तम् ।

वैशाखशुक्लसप्तम्यां गङ्गोत्पत्तिः । सा परदिन एव मध्याह्णव्याप्तौ पराऽन्यथा पूर्वा । मयूखमते तु पूर्वाह्णव्यापिनी । वैशाखशुक्लचतुर्दशी नृसिंहजयन्ती । सा प्रदोषव्यापिनी[2] । दिनद्वये तद् व्याप्तावव्याप्तावेकदेशसमव्याप्तौ वा परा । वैषम्ये त्वधिका । दीक्षितमते[3] तु दिनद्वयेऽप्यव्याप्तौ पूर्वा ।

इति वैशाखः

अथ ज्येष्ठः

ज्येष्ठशुक्लप्रतिपत् करवीरव्रते औदयिकी । अस्यामेव दशहरास्नानाद्यारम्भः । ज्येष्ठशुक्लद्वितीया सोपपदा ।

रत्नमञ्जरी टीका

(१) युगादौ श्राद्धं च पिण्डरहितमेव । कृत्यकौमुद्यां मार्कण्डेयवचनं यथा —"युगादौ षडशीत्याञ्च गृहाच्छादन एव च ।
नित्यश्राद्धे च संक्रान्त्यामपिण्डं श्राद्धमिष्यते ।।"

(२) नृसिंहजयन्तीव्रतस्य ग्राह्यकालश्चोक्तः वार्षिकपर्वसंग्रहे (पृ०—१६)
"सायं काले नृसिंहः समजनि भगवान् माधवे शुक्लभूते ।
व्याप्तिश्चैकत्र नोचेद् व्रतमिह शुभदं सर्वथा स्यात् परेद्युः ।।"

कृत्यकौमुद्यामपि—"उभयव्याप्तिपक्षे नोभयव्याप्तिपक्षेऽपि परैव ।"
जयसिंहकल्पद्रुमेऽपि (पृ०-५४७)—"वैशाखस्य चतुर्दश्यां सोमवारेऽनिलर्क्षके ।
अवतारो नृसिंहस्य प्रदोषसमये द्विजाः ।।"

(३) भट्टोजीदीक्षितस्य चतुर्विंशतिमतसंग्रहे (पृ० – १३७)

"सिता ज्येष्ठ द्वितीया च आश्विने दशमी सिता।
चतुर्थी द्वादशी माघे एतास्सोपपदाः स्मृताः ॥"

इति कालादर्शोक्तेः। आसु वेदाध्ययनं न कर्त्तव्यम्। ज्येष्ठशुक्लतृतीया रम्भाव्रते पूर्वविद्धैव[१]।

ज्येष्ठशुक्लदशमी दशहरा। अस्यां दशयोगा उक्ताः स्कान्दे[२]—

"ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः।
गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ ॥
दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥" इति।

इयं योगविशेषबाहुल्यात् पूर्वा परा वा ग्राह्येति बहवः। कौस्तुभे तु पाठादेव दशत्वे सिद्धे पुनर्दशयोग इति कीर्त्तिनं कीर्त्तितानां दशानामेव पुण्यकालत्वज्ञापनार्थम्। इति। अतएव यत् कैश्चिदुक्तं दिनद्वये कपययोगवद्दशम्यसत्त्वे यत्रैव योगभूयस्त्वं तत्रैव स्नानादि कार्यमिति। तच्चिन्त्यम्। गंगापूजादौ देवकर्मणि पूर्वाह्णस्य पुण्यकालत्वात्तद्व्यापिन्येव दशमी ग्राह्येत्युक्तम्। ज्येष्ठस्य[३] मलत्वे तत्रैव दशहरा कार्यं, न तु शुद्धे। कृत्यरत्नावल्यां त्वधिकमासे शुद्धे चापीयं कार्येत्युक्तम्। ज्येष्ठशुक्लैकादशी निर्जला। ज्येष्ठपौर्णमासी[४] सावित्रीव्रते पूर्वविद्धा ग्राह्या। अष्टादशघटिकामिता यदि चतुर्दशी तदा परैवेति मधावः।[५]निर्णयसिन्धुकालतत्त्वविवेचनस्मृतिकौस्तुभादौ त्वष्टादशनाडीवेधेऽपि पूर्वैवेत्युक्तम्। इदञ्च व्रतं त्रयोदशीमारभ्य पूर्णिमान्तं कर्त्तव्यम्। अत्र पूर्णिमानुरोधेन यथात्र संगतिर्भवति तथा त्रयोदश्यादि ग्राह्यम्। इदं व्रतमविशेषादविधवाभिविधवाभिर्वा सर्वाभिस्त्रीभिः कार्यम्। पारणं तु पौर्णिमान्ते। ज्येष्ठामायामेतद् व्रतं कार्यमिति निर्णयामृते। ज्येष्ठामायामेव भावुकापूजनम्।

इति ज्येष्ठः

रत्नमञ्जरी टीका

(१) धर्मसिन्धावपि (पृ०-६५) पूर्वविद्धैव स्वीकृता।

(२) व्रतोद्यापनकौमुदी (पृ०-४६), निर्णयसिन्धुः (पृ०-७६)

(३) "दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु" इति हेमाद्रौ ऋष्यश्रृङ्गोक्तेरिति निर्णयसिन्धुः (पृ०-७६), धर्मसिन्धुः (पृ०-६७)।

(४) "पूर्वविद्धैव सावित्रीव्रते पञ्चदशी तिथिः।
नाड्योऽष्टादशभूतस्य स्युश्चेत्तत्र परेऽहनि ॥" इति माधवाचार्यमतमिति निर्णयसिन्धौ (पृ०-७६)।

(५) निर्णयसिन्धुः (पृ०-७६)।

अथाषाढ़ः

आषाढ़शुक्लद्वितीयायां पुष्ययुक्तायां केवलायां वा रथोत्सवः। आषाढ़शुक्लषष्ठी स्कन्दाख्या पूर्वविद्धा। आषाढ़शुक्लद्वादश्यामनुराधायोगरहितायां पारणं कुर्यात्। असम्भवे प्रथमपादमुत्सृजेत्। यदा तु स्वल्पद्वादश्यां वर्ज्यनक्षत्रयोगस्तदा निषेधमनादृत्य द्वादश्यामेव पारणं कार्यमिति कौस्तुभे। केचित्विदं निर्मूलमेवाहुः। आषाढ़शुक्लद्वादश्यामेकादश्यां वा विष्णोः शयनोत्सवः कार्यः। तत्र विशेष :—"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम्।" एताश्च द्वादश्यो रात्रिसन्ध्यादिनेष्वनुराधाश्रवणरेवतीनामादिमध्यान्तभागयुक्ताः क्रमेण [१]प्रस्वापपरिवर्त्तनप्रबोधोत्सवेषु प्रशस्ताः। यदा तु रात्र्यादि भागेषु तत्तन्नक्षत्रपादयोगो नास्ति तदा द्वादशीनक्षत्रमात्रयोगोऽपि रात्र्यादिगतो ग्राह्यः। यदा तु द्वादशीषु तानि नक्षत्राण्येकदेशेनापि न सन्त्येव किन्तु एकादशीषु त्रयोदशीषु वा तदा तत्रापि तत्तदृक्षभाग एव निशादिवेलाऽनादरेण प्रस्वापादि कार्यम्। एवञ्च द्वादश्यां निशाद्यादरेऽन्यतिथौ च नक्षत्रपादयोगादरे नियते सति यदा द्वादशीषु निशादेरन्यत्र तत्तदृक्षभागयोगोऽन्यतिथौ च तत्तदितरनक्षत्रस्यैव योगस्तदा द्वादशीषु सायं सन्ध्याप्रस्वापादि। यदा तु स्वल्पद्वादश्यस्तदापि रात्रादावेव शयनादि कार्यम्। अत्रानुराधारेवत्योश्चतुर्धाविभक्तयोराद्यन्तपादौ ग्राह्यौ। श्रवणस्य तु त्रेधाविभक्तस्य मध्यभागः। इदं च शयनादि नित्यमपि मलमासे निषिद्धम्। [२]चातुर्मास्य व्रतारम्भोऽप्याषाढ़शुक्लैकादशीद्वादशीपौर्णमासीषु कर्कटसंक्रान्तिदिने वा विकल्पेन कार्यः। स च नित्यः। अयं शुक्रास्तादावपि कार्यः। प्रथमारम्भस्तु न भवति। एकादश्यामाशौचे पौर्णमास्यां कर्कसंक्रान्तौ वा व्रतारम्भः कार्यः। त्रितयत्राप्याशौचे तु प्रथमतोऽनारम्भ एव। द्वितीयाद्यारम्भस्तु भवत्येव। अयं च शिवभक्तादिभिरपि कार्यः। चातुर्मास्यव्रतासम्भवे कार्त्तिके यत् किञ्चिद् व्रतमवश्यं कार्यम्।

रत्नमञ्जरी टीका

(१) विष्णोः शयनकालः यथा कालविवेके (पृ०-१८५) नारदीयवचनम्—

"आभाकासितपक्षेषु विष्णोरमिततेजसः।
स्वापावृत्तिप्रबोधाश्च द्वादश्यां क्रमशो मताः॥"

(२) चातुर्मासिकव्रतग्रहणे कालचतुष्टयं विशिनष्टि नीलकण्ठभट्टः ब्रह्मवैवर्त्तवचनेन—

"एकादश्यां तु गृह्णीयात् संक्रान्त्यां कर्कटस्य वा।
आषाढ्यां वा नरो भक्त्या चातुर्मास्रव्रतक्रियाम्॥"

जीमूतवाहनोऽपि (कालविवेके पृ०-३३२)—

"आषाढ़ी पौर्णमासी युक्ता एकादशीद्वादशी कर्कटसंक्रान्तिर्वा।"

आषाढ़पूर्णिमा कोकिलाव्रतारम्भे प्रदोषव्यापिनी। केचित् सायाह्नव्यापिनी। दिनद्वये सत्त्वे परेत्याहुः। इयमेव क्षौरव्यासपूजादौ त्वौदयिकी त्रिमुहूर्त्ता चेत् पराऽन्यथा पूर्वा। कृत्यरत्नावल्यादौ तु मध्याह्नव्यापिनी। दिनद्वये सत्वे परैवेत्युक्तम्।

इत्याषाढ़ः

अथ श्रावणः

श्रावणशुक्लतृतीया मधुश्रवाख्या गुर्जरेषु प्रसिद्धा। सा परयुतेति दिवोदासीये। श्रावणशुक्लचतुर्थी दूर्वागणपतिव्रते मध्याह्नव्यापिनी। दिनद्वये तद् व्याप्तावव्याप्तौ वा पूर्वा। श्रावणशुक्लपञ्चमी नागपूजादौ परविद्धा। पूर्वेद्युस्त्रिमुहूर्त्ता चतुर्थीविद्धा परेद्युस्त्रिमुहूर्त्ता सती षष्ठीयुक्ता सा परैव। इतरथा तत्रापि पूर्वविद्धैवेति वृद्धाः। श्रावणशुक्लद्वादश्यां दधिव्रतारम्भः। तक्रादीनान्त्वनिषेधः। अस्यामेव विष्णोः पवित्रारोपणम्।[२] अधिवासनं तु गोदोहान्तरितकाले पूर्वेद्युर्वा कार्यम्। नित्यं चैतत्। श्रावणशुक्लचतुर्दशी चैत्रशुक्लचतुर्दशीवत्।

अथ श्रावणपौर्णमास्यामुपाकर्म। तत्र बह्वृचैरोषधिप्रादुर्भावे सति शुक्लप्रतिपदादि श्रावणमासगते अदुष्टे श्रवणे वैदिककर्मत्वात् पूर्वाह्णे कार्यम्। यजुर्वेदिभिः पर्वणि पूर्वाह्णे कार्यम्। तत्र तैत्तिरीयैरौदयिके। वाजसनेयिभिस्तु पूर्वविद्धे इति हेमाद्रिमदनपारिजातादयः। मदनरत्नमते तु सर्वैर्याजुषैरौदयिके पर्वणि कार्यम्। हेमाद्र्युक्तैव व्यवस्था युक्तेति निर्णयसिन्धुमयूखकौस्तुभादौ। [३]छन्दोगैस्तु सिंहस्थे सूर्ये हस्तनक्षत्र एवापराह्णे। अथर्ववेदिभिश्चादुष्टश्रावण्यां पूर्वाह्णे। एषां

रत्नमञ्जरी टीका

(१) निर्णयसिन्धुः (पृ०-८७)

(२) अधिवासनकालश्च निर्णयसिन्धौ (पृ०-८७) दीपिकोक्तिर्यथा—

"गोदोहान्तरिते काले पूर्वेद्युर्वाऽधिवासनम्।"

(३) कालविवेकः (पृ०-२७७)

ग्रहसंक्रान्तिदुष्टत्वे तत्र सूतकादिसंभावनायां वा [1]बह्वृचैर्हस्तयुक्तायां श्रावणशुक्लपञ्चम्यां केवल-पञ्चम्यां वा हस्तयुक्ते श्रावणशुक्लतिथ्यन्तरे वा कार्यम् । **यजुर्वेदिभिस्तु** श्रावण्यसंभवे येषां गृह्ये श्रावणहस्तपञ्चम्यावुक्तेस्तैस्तत्र कर्त्तव्यम् । तयोरप्यसम्भवे भाद्रपदपौर्णमास्यां तद्गतहस्तपञ्चम्योर्वा कार्यम् । येषां गृह्ये तेनोक्तेतैर्भाद्रपद्येव ग्राह्याः । **बौधायनीयैस्तु** श्रावण्यसंभवे आषाढ्यामेव कार्यम् । **सामगानां** तु सिंहार्कहस्तस्य ग्रहसंक्रान्तिदुष्टत्वे उपाकर्म लुप्यत एव । **अथर्ववेदिभिः** श्रावण्यसंभवे प्रोष्ठपद्यां कार्यम् । ग्रहसंक्रान्तियोगश्चोपाकर्मसम्बन्धिन्यहोरात्रे भाव्यर्द्धरात्रात् पूर्वं नक्षत्रपर्वणो-र्विद्यमानस्तयोर्दूषको न परस्तात् ।

तथातीतादर्धरात्राद् परतो विद्यमानो, न तत् पूर्वः । नाप्युपाकर्माङ्गभूततिथिनक्षत्रापेक्षया पूर्वोतरकालीने तिथ्यन्तरे नक्षत्रान्तरे वा विद्यमानः । यदा तु गौणकालेऽप्योषधिप्रादुर्भावाभावो ग्रहसंक्रान्तियोगो वा निमित्तान्तरेण केनचिदतिपत्तिर्वा भवति, तदा वर्षर्त्तु मध्ये यदा कदाचित् कार्यं न तु श्रावणसम्बन्धनियमः । एतानि हस्तश्रवणपर्वाणि दिनद्वयेऽपि कर्मकालव्याप्तावव्याप्तौ चौदयिकानि प्रातः संगवात्मकषण्मुहूर्त्तव्यापीनि ग्राह्याणि । **निर्णयसिन्धौ** तु घटिकाद्वयपरिमितेऽपि श्रवणे उपाकर्मोक्तम् । यदा पूर्वदिने त्रिमुहूर्त्ताधिका वोत्तराषाढ़ा, उपरिष्टाच्च श्रवणः परदिने क्षयव-शादुदये च नास्ति तदा पञ्चम्यादौ कार्या । न तु पूर्वविद्धे श्रवणे । न हि मुख्याभावे निषिद्धमिश्रग्रहणं संभवति । पञ्चम्यादिकालत्रयासंभवे तूत्तराषाढविद्धमपि ग्राह्यम् । एवं पर्वापि । एतच्च शुक्रास्तादा-वपि कार्यम् । प्रथमारम्भस्तु न भवति । प्रथमारम्भे तु वृद्धिश्राद्धं कुर्यात् । द्वितीयादिप्रयोगोऽप्यधिमासे सामगभिन्नैर्न कार्यः । इदं त्रयाणामपि वर्णानां नित्यम् । उत्सर्जनं तु **बह्वृचैर्माघ्यां** कार्यम् । **याजुषैः** पौषे रोहिण्यामष्टकायां वा ।

मनुस्तु—"पुष्ये तु छन्दसां कुर्यादुत्सर्गं विधिवद् द्विजः ।
माघ शुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ॥"

इत्याह । तत्रेयं **व्यवस्था** । यदा श्रावण्यामुपाकर्म, तदा पौषशुक्लप्रतिपदि । प्रोष्ठपद्यामुपा-कृतौ तु माघशुक्लप्रतिपदीति । **बौधायनाः** पौष्यां माघ्यां वा । **तैत्तिरीयाः** पौष्याम् । **कातीयाः**

रत्नमञ्जरी टीका

(१) बह्वृचामुपाकर्मकालः यथा कालसारे (पृ०-१४७) गार्ग्यवचनम्—

"पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयकाः ।
बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रान्तिवर्जिते ॥"

भाद्रपदे । सामगाः सिंहार्के पुष्ये । यदा तु सिंहस्थे सूर्ये सति तन्मध्यस्थहस्तनक्षत्रात् प्राक् पुष्यः कर्कस्थो भवति तदा कर्कस्थ पुष्ये एव [1]सामगैरुत्सर्गं कृत्वा तदुत्तरसिंहार्कहस्ते उपाकर्म कार्यम् । सर्वैरुपाकर्म दिने वा कार्यम् । उत्सर्जनकाला अपि खण्डत्वे औदयिकत्वादिनोपाकर्मकालवदेव निर्णेयाः । एतच्च कर्मद्वयं प्रत्यब्दं कार्यम् । उपाकर्मोत्सर्जनानन्तरं त्रिरात्रं पक्षिणीमहोरात्रं वाऽध्ययनं न कार्यम् । सग्निष्यत्वे लौकिकाग्नावेव कर्त्तव्यमन्यथा तु स्मार्त्ताग्नौ । [2] उपाकर्माङ्गिभूत-स्नाने नदीनां रजोदोषो नास्ति ।

अस्यामेवापराह्णव्यापिन्यां भद्रारहितायां रक्षाबन्धनं कार्यम् । दिनद्वये तद् व्याप्तौ पूर्वा । **कौस्तुभमते** त्वौदयिकी । यदा परेद्युस्त्रिमुहूर्त्तं पर्व, पूर्वेद्युस्त्रिमुहूर्त्तचतुर्दश्युत्तरं पर्व, तदोपाकर्मणः परत्रानुष्ठानेऽप्यपराह्णकालानुरोधेन पूर्वत्रैव रक्षाबन्धन, भद्रान्तेन परत्र । तैलाभ्यङ्गश्चात्र कार्यः । अस्यामेव रात्रौ श्रवणाकर्म सर्पबलिश्च कार्यः । तयोरस्तमययोगिनीपूर्णिमा ग्राह्या । दिनद्वये तद् व्याप्तावव्याप्तौ वोत्तरा । **याज्ञिकास्तु** पर्वसन्धिदिने रात्रौ श्रवणाकर्मानुष्ठानं वदन्ति । इदं च कर्मद्वयं समानतन्त्रं कार्यम् । इदमभुक्तैव कार्यमिति **प्रयोगरत्ने** । भुक्त्वा कार्यमिति **केचित्** । श्रवणाकर्मणो मुख्यकाले दैवादकरणे लोपः । मुख्यकालेऽपि सकृदेव करणमिति **केचित्** । अन्ये त्वीदृशपाकयज्ञानां प्रत्यब्दमावृत्तिं मन्यन्ते ।

अस्यामेव हयग्रीवोत्पत्तिः । अत्रैव सर्वदेवानां पवित्रारोपणम् । तत्र कुलधर्मव्रतादौ च पूर्व-विद्धैव । श्रावणादिमासचतुष्टये कृष्णपक्षद्वितीयास्वशून्यशयनव्रतम् । तत्र पूर्वविद्धा ग्राह्येति **केचित्** ।

रत्नमञ्जरी टीका

(१) याजुषामुत्सर्जनकालश्च याज्ञवल्क्येन (१-१४३)—

"पौषमासस्य रोहिण्यामष्टकायामथापि वा ।
जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद् बहिः ।।"

(२) सामवेदिनस्तु—"सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णेऽविवरे बहिः ।
छन्दोगा मिलिता कुर्युरुत्सर्गं स्व स्वछन्दसाम् ।।"

इति गार्ग्यवचनानुसारमेवोत्सर्जनं कुर्युः ।

(३) अस्मिन् उपाकर्मणि कर्त्तव्ये नदीनां रजोदोषाभावः छन्दोगपरिशिष्टे कात्यायनः कथयति यथा—"उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च ।
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते ।। कालविवेकः (पृ०-२५०)

मदनरत्नकौस्तुभनिर्णयामृतादि मते तु चन्द्रोदयव्यापिनी। दिनद्वये तत्र सत्त्वेऽसत्त्वे वा परा। **श्रावण-कृष्णतृतीया** कज्जलीसंज्ञेत्युक्तम्। इयमेव विशालाक्षीयात्रायां रात्रिव्यापिनी। **श्रावणकृष्णचतुर्थी** बहुलाख्या मध्यदेशे प्रसिद्धा। सा सायाह्नव्यापिनी। दिनद्वये तथात्वे पूर्वा। इयमेव संकष्टचतुर्थीव्रते **चन्द्रोदयव्यापिनी**। **दिनद्वये** सत्त्वे पूर्वेति **केचित्**। **परेत्यन्ये**। दिनद्वये तदभावेऽप्युत्तरैवेति **कौस्तुभादौ**। दिनद्वये चन्द्रोदये सत्त्वेऽसत्त्वे वा पूर्वैवेति तु युक्तम्।

श्रावणकृष्णषष्ठी हलषष्ठी। [१]सा सप्तमीयुता। श्रावणकृष्णसप्तमी शीतलाव्रते मध्याह्नव्या-**पिनी**। दिनद्वये सत्वे[२] पूर्वा। **श्रावणकृष्णाष्टमी** जन्माष्टमी। साऽर्द्धरात्रव्यापिनी ग्राह्या। दिनद्वये तद्व्याप्तावव्याप्तावंशतः समव्याप्तौ च परा। वैषम्ये त्वधिका। रोहिणीयोगेनेयं चतुर्धा। पूर्वेद्युरेव निशीथे रोहिणीयोगे पूर्वा। परेद्युरेवोभयेद्युरपि वा योगे परा। यदा पूर्वेद्युर्निशीथेऽष्टमी परेद्युः स्वल्पाष्टमी रोहिणी च, तदा **हेमाद्रिमाधवादि**-सकलनिबन्धकारमते परा। **मयूखकारमते** पूर्वा। [३]**निर्णयशिन्धुकारमते** तूपवासद्वयम्। यदि परेऽह्न्यष्टमी निशीथादर्वाक् पूर्वेऽह्नि च निशीथोत्तर-प्रवृत्ताऽष्टमी रोहिणीयुक् तदा परा। उभयेद्युरुभयस्य निशीथाऽसम्बन्धेऽपि परैव। [४] पारणं तु दिवा निशि [५]वोभयान्तेऽन्यतरान्ते वा कुर्यात्। महानिशाऽव्यवहितपूर्वक्षण एव महानिशायां वः एकतरस्यो-भयोर्वान्तिलाभे तु तत्रापि तत्। **मयूखमते** त्वत्र दिवैव पारणम्। अशक्तस्त्वन्यतरान्तस्याप्यभावे

रत्नमञ्जरी टीका

(१) हलषष्ठी सप्तमीयुतेति दिवोदासवचनं कमलाकरोऽपि (निर्णयसिन्धुः पृ०-९५) उदाहरति।

(२) निर्णयसिन्धावपि (पृ०-९५) हेमाद्रिः शीतलाव्रतं पूर्वविद्धां स्वीकरोति।

(३) अतो जयन्तीव्रतस्यापि नित्यत्वादुपवासद्वयं कार्यमिति ब्रूमः। निर्णयसिन्धुः (पृ०-९७)

(४) पारणकालश्च कृत्यकौमुद्यां भविष्योत्तरवचनैः यथा—

"अष्टम्यामथ रोहिण्यां न कुर्यात् पारणं क्वचित्।
हन्यात् पुराकृतं पुण्यमुपवासार्जितं फलम्॥
तिथिस्त्रयोदशं हन्ति नक्षत्रं च चतुर्गुणम्।
तस्मात् प्रयत्नतः कुर्यात् तिथिभान्ते च पारणम्॥

(५) वोभयान्ते-तिथिनक्षत्रयोः एकत्रयोगे उभयोरन्ते, तिथेः नक्षत्रस्य वा एकस्य समाप्तौ पारणं कर्त्तव्यमिति भावः।

उत्सवान्ते प्रातरेव पारणं कुर्यात्। श्रावणामावास्यायां कुशग्रहणं कार्यम्। केचित्तु भाद्रपददर्शे **कुशग्रहणमाहुः।**

इति श्रावणः

अथ भाद्रपदः

भाद्रशुक्लप्रतिपन्महत्तमाख्ये शिवव्रते पूर्वविद्धा सायाह्नमात्रव्यापिनी ग्राह्या। भाद्रशुक्लतृतीया हरितालिकाव्रते मुहूर्त्तमात्राकलाकाष्ठामात्रापि परा। [1]**माधवमते** सम्पूर्णामपि पूर्वां त्यक्त्वा मुहूर्त्तमात्रापि परा। भाद्रशुक्लचतुर्थी सिद्धिविनायकव्रते परदिन एवांशेन साकल्येन वा मध्याह्नव्यापिनी परा। अन्यथा सर्वपक्षेषु पूर्वा। अस्यां रात्रौ चन्द्रं न पश्येत्। तत्रापि चतुर्थ्यामुदितस्य पञ्चम्यां दर्शने न दोष इति [2]**निर्णयसिन्धौ**। रात्रौ चन्द्रदर्शननिषेधाद् दिवा तद्दर्शने न दोष इति **मयूखादौ**। दिवाऽपि चन्द्रो न द्रष्टव्य इति तु युक्तम्। **निर्णयामृते** तु शुक्लचतुर्थीमात्रे चन्द्रदर्शननिषेध इत्युक्तम्। प्रमादाच्चन्द्रदर्शने प्राङ्मुख उदङ्मुखो वा तद्दोषशान्त्यर्थम्—

"[3]सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।
सुकुमारकमारोदीस्तव ह्येष स्यमन्तकः॥"

इति श्लोकं पठेत्। अनेनाभिमन्त्रितं जलं पेयम्। स्यमन्तकोपाख्यानञ्च श्रोतव्यमाचारात् स्मार्त्त इति **कृत्यरत्नावल्याम्।**

भाद्रशुक्लपञ्चमी ऋषिपञ्चमी। सा मध्याह्नव्यापिनी। दिनद्वये सत्त्वे **हेमाद्रिमते** च परा। [4]**माधवमते** पूर्वा। दिनद्वये तदभावे पूर्वेति **मयूखतिथ्यर्कादौ**। परेति **कौस्तुभे**। भाद्रशुक्लषष्ठी

रत्नमञ्जरी टीका

(१) तत्र हरितालिकाव्रतं "मुहूर्त्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे" ति माधवोक्तेः परा ग्राह्या इति निर्णयसिन्धौ (पृ—१०१)

(२) निर्णयसिन्धुः (पृ—१०२)

(३) ब्रह्मपुराणे (१६/३६)

(४) "सर्वत्र पञ्चमी पूर्वे" त्युक्तेरिति व्रतराजः (पृ—१३६)। व्रतोद्यापनकौमुद्यां शतानन्दसंग्रहेऽपि पूर्वा।

सूर्यषष्ठी । सा सप्तमीविद्धेति **दिवोदासः** । इयमेव भौमवारविशाखानक्षत्रवैधृतियोगैर्युक्ता चम्पासंज्ञा । तस्यां मल्लारेः पूजा दर्शनं च कार्यम् । भाद्रशुक्लाष्टम्यां दूर्वाव्रतं रौहिणसंज्ञकनवममुहूर्त्तव्यापिन्यां ज्येष्ठामूलरहितायां कार्यम् । अत्र ज्येष्ठामूलविवर्जितायाः परदिन एव रौहिणव्याप्ती परा । दिनद्वये तद्व्याप्तितदव्याप्त्योः पूर्वदिने च ज्येष्ठामूलयुतायां परा । दिनद्वयेऽपि निषिद्धयोगरहितायास्तद्व्याप्तौ तदव्याप्तौ तदेकदेशव्याप्तौ वा पूर्वा । यदा तु पूर्वदिने रौहिणव्यापिन्यपि निषिद्धनक्षत्रयोगिनी परदिने तादृशनक्षत्रयोगरहितापि रौहिणसंस्पर्शिनी तदाऽपि परैव । कन्यार्केऽगस्त्योदये च नेदं कर्त्तव्यम् । शुक्लेऽगस्त्योदये भाविनि सन्निहित तत्पूर्वकृष्णाष्टम्यामेतत् कार्यम् । अनिषिद्धकालस्य सर्वथैवालाभे तु निषिद्धकालेऽपि व्रतानुकल्पोऽनुष्ठेयः । भाद्रस्याधिकमासत्वे मले एवैतत् कार्यम् । इदं च व्रतं स्त्रीणां नित्यम् । [१]अगस्त्योदयश्च सिंहसंक्रान्तिदिनमारभ्यैकविंशतिमे त्रयोविंशतिमेवांशे भवति । अर्घ्यश्चागस्त्योदयानन्तरं कन्यासंक्रान्तिपर्यन्तं देयः । इयमेव ज्येष्ठापूजने ज्येष्ठानक्षत्रयोगवशेन पूर्वा परा वा ग्राह्या । दिनद्वयेऽपि नक्षत्रयोगे परदिने मध्याह्नादूर्ध्वं नक्षत्रसत्त्वे पराऽन्यथा रात्रावपि नक्षत्रयोगे पूर्वैव । दिनद्वयेऽपि ज्येष्ठानक्षत्रयोगाभावे तु परा । यत्तु ज्येष्ठानक्षत्रमात्रापेक्षं तिथिव्रताद् भिन्नं दाक्षिणात्येषु प्रसिद्धम् । ज्येष्ठापूजारूपं व्रतं, तद्यस्यां तिथौ ज्येष्ठानक्षत्रं भवति तस्यां तिथौ कर्त्तव्यम् । खण्डत्वे सूर्यास्तमयव्यापी ग्राह्यम् । दिनद्वये सत्त्वे तदभावे वा पूर्वा एव । परदिन एवास्तसम्बन्धे तु परम् । कालतत्त्वविवेचनकारास्त्वष्टमीभानुवारयुगन्यतरयुग्वा ज्येष्ठानक्षत्रं ग्राह्यम् । अन्यतरयोगस्याप्यभावे मध्याह्नादूर्ध्वमनुवर्त्तमानं ग्राह्यमित्याहुः । निर्णीतपूजादिनात् पूर्वदिनेऽनुराधायामावाहनमुत्तरदिने मूले च विसर्जनम् ।

रत्नमञ्जरी टीका

(१) अगस्त्योदयकालश्च बृहत्संहितायाम् (१–१२–१४)—

"संख्याविधानात् प्रतिदेशमस्य, विज्ञाय सन्दर्शनमादिशेज्ज्ञः,
तच्चोजयिन्यामगतस्य कन्यां, भागैः स्वराख्यैः स्फुटभास्करस्य ॥"

कृत्यतत्त्वार्णवे (पृ—१६५)—

"पलप्रभा तत्त्वहृता खगांकयुता स्फुटार्केण यदा समा स्यात् ।
याम्यां सदा स्यादुदयो निशान्ते मुनेरगस्त्यस्य सुरारिहन्तुः ॥"

कृत्यकौमुद्यामपि—दशनक्षत्र षडंशकषोडशलिप्तिकाभोगे सूर्यस्यागस्त्योदयो भवेदिति संक्षेपः ।

अस्यामेवाष्टम्यां महालक्ष्मीव्रतारम्भम् । अस्य च [१]प्रथमारम्भः सिंहस्थे सूर्ये सत्येव कार्यो, न कन्यास्थे । समाप्तिश्च नवमीवेधो रवेर्हस्तोत्तरगतत्वं त्रिदिनत्वमवमदिनत्वं चेति दोष-चतुष्टयरहितायामष्टम्यां कार्या । यस्मिंश्च वर्षे प्रारब्धस्य महालक्ष्मीव्रतस्योक्तनिषेधकाले समाप्तिः प्रसक्ता भवति तस्मिन् वर्षे नास्यारम्भो विधेयः । द्वितीयादिप्रयोगे सति संभवे अनिषिद्धकाले एव समापनम् । असत्यां गतौ निषिद्धेऽपि । व्रतस्य षोडशाब्दसाध्यत्वेन मध्ये त्यागायोगात् । इदं च व्रतमष्टम्याः द्वेधे यत्र ज्येष्ठायोगस्तत्रारब्धव्यम् । तदसम्भवे केवलायामपि नवमीयुक्तायाम् । इयं ज्येष्ठायुता परा ग्राह्या । तदभावे केवलापीति विवेचनादौ । मयूखमते तु निशीथोत्तरवर्तिनी । भाद्र-शुक्लैकादश्यां द्वादश्यां वा विष्णोरङ्गपरिवर्त्तनं कार्यम् । भाद्रशुक्लद्वादश्यां श्रवणयोगरहितायां पारणं कुर्यात् । असम्भवे मध्यगाविंशतिनाडीस्त्यजेत् । केचित्तु चतुर्धा विभज्य मध्यमपादद्वयं त्यजेदि-त्याहुः ।

इयमेव श्रवणद्वादशी । अत्रोपोषणं कार्यम् । एषा च द्वादशी कलामात्रश्रवणायोगेऽपि कृत्स्ना पुण्यतमा भवति । एकादश्यां द्वादशीश्रवणायोगे सैवोपोष्या । एकादश्याः श्रवणायुतद्वादशीमात्रयोगे विष्णुश्रृङ्खलयोग इति हेमाद्रिः । [२]निर्णयामृतमते तु श्रवणस्यैकादशीद्वादशीभ्यां योगे स नान्यथा । निशीथानन्तरमर्कोदयावधिकलामात्रमपि वैष्णवर्क्षं भवति, तदा पूर्वैव । शुद्धाधिकायाः दिनद्वयेऽपि श्रवणायोगे उदये तद्योगवती । उभयत्र तथात्वे पूर्वा । यदैकादश्यामेव श्रवणं न द्वादश्यां

रत्नमञ्जरी टीका

(१) महालक्ष्मी व्रतारम्भकालः यथा निर्णयामृते पुराणसमुच्चयवचनम्—

"श्रियोऽर्चनं भाद्रपदे सिताष्टमीं, प्रारभ्य कन्यामगते च सूर्ये ।
समापयेत्तत्र तिथौ च यावत्सूर्यस्तु पूर्वार्धगतो युवत्याः ।।"

निर्णयसिन्धुः (पृ—११५)

(२) निर्णयामृते तु विष्णुश्रृङ्खलस्वरूपं यथा—

"द्वादशी श्रवणर्क्षं च स्पृशेदेकादशी यदि ।
तद्विष्णुश्रृङ्खलं नाम विष्णुसायुज्यकृद् भवेत् ।।

निर्णयसिन्धुः (पृ—१०४)

तदाऽपि पूर्वैव । [१]यदा द्वादश्ये च ऋक्षयुता तदा शक्तेनोपवासद्वयं विधाय त्रयोदश्यां पारणं कर्त्तव्यम् । अशक्तः स्वीकृतैकादशीव्रतस्त्वेकादश्यामुपोष्य श्रवणद्वादश्यां तत्प्रयुक्तं विष्णुपूजा दध्योदनदानादिकं कृत्वा पारणं कुर्यात् । अस्वीकृतैकादशीव्रतोऽशक्तस्तु श्रवणद्वादशीमेवोपवसेत् । श्रवणयुतशुद्धैकादश्यलाभे दशमीविद्धाऽपि ऋक्षयुता कार्या । येषां तत्रैवैकादशीव्रतप्रसक्तिस्तेषां तन्त्रेण व्रतद्वयसिद्धिः । अन्येषां तूपवासद्वयम् । एतच्च गौडाभिमतं काम्यत्वमनुसृत्योक्तम् । यदा तु दाक्षिणात्य प्रसिद्धं नित्यत्वमङ्गीक्रियते, तदोभयोर्नित्यत्वादेकादश्यामशक्तेन फलाहारं कृत्वा श्रवणद्वादश्यां निराहारोपवासः कार्यः । कौस्तुभमते त्विदं व्रतं नित्यं काम्यम् । पारणे तूभयान्तो मुख्यः । एकतरान्तो गौणः । मदनरत्ने तूभयान्ते तिथिमात्रान्ते वा पारणं न नक्षत्रमात्रान्ते इत्युक्तम् ।

इयमेव वामनजयन्ती । [२]श्रवणयुक्ता सा मध्याह्नव्यापिनी । दिनद्वये तद्व्याप्तौ तदव्याप्तौ पूर्वविद्धा । पारणा तु जयन्तीवदेवोभयान्तेऽन्यतरान्ते वा । हेमाद्रौ त्वेकादश्यां श्रवणयुतायां वामनजन्मोक्तम् । तत्र कल्पभेदेन व्यवस्थेति बहवः । श्रवणायुक्तद्वादश्यलाभे श्रवणायुक्तैकादश्यां वामनजयन्ती उपवासविधानपरमिति कौस्तुभे । अस्मत् प्रपितामह श्रीरत्नाकरभट्टचरणास्तु द्वादशीशब्देनैकादश्या एवाभिधानाद् हेमाद्रिभागवतयो राजस्येनैव संगतिरित्याहुः । सम्प्रति तु भागवतपक्ष एवाद्रियते शिष्टैः । तिथिद्वयेऽपि श्रवणयोगाभावे तु द्वादश्यामेवोपवासः । अस्यामेव दुग्धव्रतसंकल्पः । दुग्धव्रते पायसादिकं वर्ज्यम् । दधिघृतादयस्तु ग्राह्या एव ।

रत्नमञ्जरी टीका

(१) एकादश्याश्च पारणकालः कालसारे (पृ—१२७) यथा—

"श्रवणर्क्षसमायुक्ता द्वादशी यदि लभ्यते ।
उपोष्य द्वादशीं तत्र त्रयोदश्यान्तु पारणम् ॥"

कालविवेकेऽपि (पृ-४५६-४६०)— "एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिः ॥"

(२) वामनजयन्त्याः कालः यथा मदनरत्ने वह्निपुराणवचनम्—

"दशम्येकादशी यत्र सा नोपोष्या भवेत्तिथिः ।
श्रवणेन तु संयुक्ता सा चेत् स्यात् सर्वकामदा ॥" इति

निर्णयसिन्धु; (पृ—१०७)

भाद्रशुक्लचतुर्दश्यनन्तव्रते मध्याह्नव्यापिनीति केचित् । [1]युक्ता तूदयव्यापिनी । साऽपि तिथ्यन्तरे च त्रिमुहूर्त्तेति मुख्यः कल्पः । द्विमुहूर्त्तेत्यनुकल्पः । मुहूर्त्तमपि चेद् भाद्रे इति स्कान्दं तु त्रिमुहूर्त्तप्रशंसापरम् । दिनद्वये उदयव्यापित्वे पूर्वा । पूजनं तु मध्याह्न एव कार्यम् । निर्णयामृते तु स्वल्पायामप्यौदयिक्यां चतुर्दश्यामुपक्रम्य पूर्णिमाभागेऽपि पूजादिकं कार्यमित्युक्तम् ।

भाद्रपदपौर्णमास्यां प्रपितामहात् परांस्त्रीनुद्दिश्य सपिण्डकं श्राद्धं कार्यम् । एतच्च नित्यम् । इद च श्राद्धं भाद्रपदमासान्तर्गते कुत्रचिद्दिने कन्यासंक्रमणे तन्मासमध्यवर्त्तिन्यां पौर्णमास्यां कर्त्तव्यमित्युक्तं हेमाद्रौ । कृत्यरत्नावल्यां त्वस्यां कन्यार्कयुक्तायां श्राद्धमुक्त्वा नित्यत्वाच्च यस्मिन् वर्षे भाद्रपद्याः कन्यार्कयोगाभावस्तदाश्वयुज्यां कन्यार्कयुक्तायां कार्यम् । हेमाद्र्युक्तस्य भाद्रपद्युपलक्षणत्वस्यायुक्तत्वादित्युक्तम् । मातामहास्तत्र कृतकृत्याः ।

अथ महालयः । तत्र श्राद्धं नित्यं काम्यं च । तत्रापि पूर्णः पक्षः श्राद्धकालः । पञ्चम्यादि प्रशस्ततरः । ततोऽपि दशम्यादिः । तत्रापि मघात्रयोदशी । दरिद्रस्तु [2]शाकमात्रेणाप्येकत्राह्नि महालयश्राद्धं कुर्यात् । तत्र प्रतिपदादिदर्शान्तमित्यस्मिन् पक्षे नन्दादिकं न वर्ज्यम् । भाद्रपदकृष्णपक्षे सकलतिथिष्वनिषिद्धे एकस्मिन्नेव दिने निषेधप्रयोजकयुक्तायामप्यमायां मृततिथिसमानजातीयायां तिथौ वा श्राद्धं कार्यम् । तच्च नित्यं काम्यं च । इदं मलमासे न कार्यम् । मातापित्रोर्मरणे प्रथमाब्दे कृताकृतम् । गुर्विणीपतिना पिण्डरहितं कार्यम् । सन्यस्तपतितपितृकेण जीवत्पितृकेणाऽपि कार्यम् । साग्निकस्य सकृन्महालयश्राद्धममायामेवेति केचित् । कृष्णपक्षसामान्यश्राद्ध एव दर्शनियम इत्यन्ये । श्राद्धाङ्गतर्पणं पक्षश्राद्धे, श्राद्धोत्तरं प्रत्यहम् । सकृन्महालये तु परेद्युः । इदं निषिद्धदिनेऽपि कार्यम् । इदं श्राद्धं चान्नेनैव कार्यं, न त्वामान्नादिना । अस्मिन् पक्षे श्राद्धाकरणे एतदनन्तरशुक्लपञ्चमीं यावत्

रत्नमञ्जरी टीका।

(१) अनन्तचतुर्दश्याः कालः माधवीये यथा—

"उदये त्रिमुहूर्त्ताऽपि ग्राह्याऽनन्तव्रते तिथिरि" ति

निर्णयसिन्धुः (पृ—१०७)

(२) श्राद्धस्यावश्यकर्त्तव्यत्वं कृत्यकल्पतरौ (श्राद्ध० पृ—१४) कात्यायनवचनम्—

"श्रद्धान्वितः श्राद्धं कुर्वीत । शाकेनापि । नापरपक्षमतिक्रमेत ।

मासि मासि वाऽशनमिति श्रुतेः ।।"

कार्यम्। अत्राप्यसम्भवे तुलासंक्रान्तिं यावत्। तत्राप्यसम्भवे वृश्चिकसंक्रान्तिं यावत् कस्मिंश्चिद्दिने कार्यम्। तयोरपि कृष्णपक्ष एवेति केचित्। तत्रापि कार्त्तिकामावास्यायां विशेषतः। मुख्यगौणकाले श्राद्धाकरणे "दुरो अश्वस्ये" ति मन्त्रं दशवारं जपेत्। [1]महालयश्राद्धे धूरिलोचनसंज्ञको विश्वदेवौ। हेमाद्र्यादिमते काम्ये धूरिलोचनौ, नित्ये तु पुरूरवार्द्रवावेव। अस्मिन् पक्षे [2]भरण्यामपिण्डश्राद्धमतिप्रशस्तम्।

भाद्रपदकृष्णषष्ठी भौमवाररोहिणीनक्षत्रव्यतीपातयोगैर्युक्ता कपिलासंज्ञा। पुराणसमुच्चये तु विशेष उक्तः—

"भाद्रे मास्यसिते पक्षे भानौ चैव करे स्थिते।
पाते कुजे च रौहिण्यां सा षष्ठी कपिला भवेत्॥" इति।

अत्र भाद्रपदमासकृष्णपक्षे षष्ठीरोहिणीनक्षत्रभौमवारव्यतीपातयोगानां चतुर्णां योगेनैव प्राशस्त्यं न केवलं षष्ठ्यादीनां सूर्यस्त हस्यस्थितत्वं सति संभवे फलातिशयप्रदम्। अतश्चेयं षष्ठी पूर्वदिने परदिने वा यत्रैव योगचतुष्टयसंभवस्सैव ग्राह्या। इयमेव चन्द्रषष्ठी। सा चन्द्रोदयव्यापिनी। उभयत्र तथात्वे पूर्वा।

भाद्रकृष्णाष्टमी महालक्ष्मीव्रतसमापने चन्द्रोदयव्यापिनी। दिनद्वये सत्त्वे तदभावे वा पूर्वा। यद्युत्तरदिने चन्द्रोदयोत्तरं त्रिमुहूर्त्ता, तदोत्तरैव। अस्यामेवाश्वलायनेन माघ्यावर्षसंज्ञकं श्राद्धं कार्यम्। अस्यामेव श्राद्धं गयाश्राद्धतुल्यफलम्। इयमष्टकाऽपि। अत्रैव नवम्यामन्वष्टकाश्राद्धम्। तच्च जीवत्पितृकेणापि मृतमातृकेणावश्यं कार्यम्। यद्यपि जीवत्पितृकस्य पञ्चाप्यन्वष्टका आवश्यकास्तथाप्यशक्तस्येयमावश्यकीति केचित्। कालतत्वविवेचनमते तु नवम्यां क्रियमाण मातृश्राद्धं महालयापरपक्षनिमित्तकमेव।

रत्नमञ्जरी टीका

(१) महालयोक्तविश्वदेवौ कालविवेकेऽपि (पृ—३१६) विवृतौ—

"पार्वणेन विधानेन कुर्यादपरपक्षकम्।
विश्वदेवाः परं चात्र विज्ञेयौ धूरिलौचनौ॥"

(२) भरण्यां पिण्डदानफलं यथा कालसारे (पृ—३६६) मत्स्यपुराणवचनम्—

"भरणी पितृपक्षे च महती परिकीर्त्तिताः।
तस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद् भवेत्॥"

अत्र स्वमातरि जीवत्यामपि सपत्नमातृभ्यो दद्यात्। अत्र सर्वासां नामनिर्देशेनैको ब्राह्मणोऽर्घ्यः पिण्डश्च। नामैक्ये तु द्विवचनादिप्रयोगः। अत्र भर्तृमरणोत्तरं पूर्वमृतमातृश्राद्धं न कार्यमिति केचित्। कार्यमित्यन्ये। एतज्जीवत्पितृकेणाऽपि गुर्विणीपतिनाऽपि सपिण्डकं कार्यम्। इदं चानुपनीतेनापि कार्यम्। जीवत्पितृकोऽपि सपत्नमातुः पार्वणं कुर्यात्। एकोद्दिष्टमिति केचित्। आचाराद् व्यवस्था। [१]अस्यामेवान्यासामपि स्त्रीणां श्राद्धार्हाणां श्राद्धं कार्यम्। तदुद्देशेन सुवासिन्यश्च भोज्याः। इदं च श्राद्धं नित्यम्। अत्राशक्तावनुकल्पमाहाश्वालायनः —

"अनडुहो यवसमाहरेदग्निना वा कक्षमुपोषेदेषा मेऽष्टकेति न त्वेवाऽन्वष्टकस्स्यादिति।,' एतदकरणे "एभिद्युभिरि" ति मन्त्रं शतवारं जपेत्। [२]सन्यासिनां वानप्रस्थानां वैष्णवानां च महालयश्राद्धं द्वादश्यामेव कार्यम्। तच्च पार्वणमेव। अत्र द्वादश्यां मृतस्य यतेराब्दिकस्यापरपाक्षिकेन प्रसङ्गसिद्धिर्द्रष्टव्या।

भाद्रपदकृष्णत्रयोदश्यां श्राद्धं कार्यम्। [३]मघायुक्तायां त्वतीव प्रशस्तम्। तच्च नित्यमविभवतै-

---

रत्नमञ्जरी टीका

(१) अत्रान्वष्टकायां स्त्रीणां श्राद्धं विधास्यति कृत्यकौमुद्यां शाट्यायनिः —

"वृद्धिश्राद्धे च मात्रादि गयायां पितृपूर्वकम्।
पिता मातामहश्चैव तथैव प्रपितामहः॥
माता पितामही चैव तथैव प्रपितामही।
मातामहप्रमातामहवृद्धप्रमातामहाः।
तेषां पिण्डं मया दत्तं ह्यक्षय्यमुपतिष्ठताम्॥"

कालसारेऽपि (पृ—३५८) वायुपुराणवचनम् —

"अन्वष्टकासु वृद्धौ च गयायां मृतवासरे।
अत्र मातुः पृथक्छ्राद्धमन्यत्र पतिना सह॥"

(२) सन्यासिनां श्राद्धविधानं यथा कालसारे (पृ—३६४) वायुपुराणवचनम्—

"सन्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद् यथाविधि।
महालये तु यच्छ्राद्धं द्वादश्यां पार्वणेन तत्॥"

(३) मघायां पिण्डदानफलं यथा मनुना (३/२७३) —

"यत् किञ्चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम्।
तदप्यक्षयमेव स्याद् वर्षासु च मघासु च॥"

रपि पृथक्कार्यम् । पुत्रवता पिण्डरहितं ब्राह्मणभोजनमात्रं कर्त्तव्यम् । एतच्च त्रयोदशीमात्रप्रयुक्त-श्राद्धविषयम् । तेनापरपक्षेऽन्वहं श्राद्धकर्त्तुस्तद्दिने पिण्डदानादिसहितसकलेतिकर्त्तव्यताकश्राद्ध-करणेऽपि न दोषः । इदमेकपार्वणकं न कार्यम् । किन्तु सर्वपार्वणकं सर्वैकोद्दिष्टं च । भाद्रस्याधि-मासत्वे मघात्रयोदशीयोगोऽधिमासि चेद् भवति तदा तत्रापि श्राद्धं कार्यम् । इयमेव योगविशेषेण गजछाया ।

"[1]योगो मघात्रयोदश्यां कुञ्जरछायसंज्ञकः ।
भवेन्मघायां संस्थे च शशिन्यर्के करे स्थिते ।।"

अत्र मघात्रयोदशीयुगादिश्राद्धानां तन्त्रता । तत्रैव महालयश्राद्धानुष्ठाने तु तेनैवैषां प्रसङ्गसिद्धिर्द्रष्टव्या ।

[2]भाद्रकृष्णचतुर्दश्यां विषशस्त्रश्वापदाहितिर्यग्ब्राह्मणविद्युदग्निनखिदंष्ट्रिशृङ्गिभिर्हतानां जलोद्बन्धनवृक्षारोहणैर्ग्रहभूताद्यावेशेन मृतानां महाप्रस्थानानशनाभ्यां विधितोऽपि मृतानां युद्धमृतानां च पितृभ्रातृपुत्रादीनां स्त्रीणामपि शस्त्रादिहतानां श्राद्धं कार्यम् । प्रायश्चित्तार्थविहितजलाग्न्यादिकृत-मरणयुक्तानामसाध्यव्याध्याद्यभिभूतत्वादग्निप्रवेशादिमृतानां च नराणां भर्तृमरणनिमित्तवह्निप्रवेशेन मृतानां प्रसवादिमृतानां च स्त्रीणां श्राद्धं न कार्यम् । अत्र शस्त्रहतस्यैव चतुर्दश्यामिति नियमः । न तु चतुर्दश्यामेव शस्त्रहतस्येति । वार्षिकादीनामकरणापत्तेर्दिनान्तरेष्वपि सामान्यवचनप्राप्तस्यापरपक्ष-श्राद्धस्य बाधकाभावेन निवर्त्तयितुमशक्यत्वाच्च । इदं च श्राद्धं पित्रादीनामप्येकोद्दिष्टमेव सदैव कार्यम् । पितृमात्रादित्रय्यां द्वयोः शस्त्रादिना मृतावेकोद्दिष्टद्वयं तन्त्रेण कार्यम् । यस्य तु पित्रादि त्रयोऽपि शस्त्रादिहतास्तेन चतुर्दश्यां पार्वणमेव कर्त्तव्यमिति चन्द्रिकाकारापरार्कहेमाद्रिप्रभृतयः । माधवस्तु तत्रैकोद्दिष्टत्रयमेवेतिदेवस्वामिमतमेव समर्थितवान् । अस्यां शस्त्रहतश्राद्धे मघास्वपि पिण्डदानं कार्यम् ।

यस्त्वेतस्यामेव चतुर्दश्यां मृतस्तस्य क्षयाहनिमित्तं श्राद्धं पार्वणमेव । चतुर्दशीनिमित्तं तु तदा न भवति । संक्रान्तिंव्यतीपातादिनिमित्तं तु चतुर्दश्यामपि पार्वणमेव । चतुर्दशीनिमित्तं तु तदा

रत्नमञ्जरी टीका

(१) राजमार्त्तण्डः (पृ—१२२)

(२) भाद्रकृष्णचतुर्दश्यां केषां श्राद्धं कर्त्तव्यमिति शङ्कायां मरीचिरपि कालसारे (पृ—३७०)

"विषशस्त्रश्वापदाहितिर्यग्ब्राह्मणघातिनाम् ।
चतुर्दश्यां क्रियाः कार्या अन्येषां तु विगर्हिताः ।।"

पृथग् भवति। अत्र चोत्पत्तिपार्वणवदपराह्णव्यापिन्येव तिथिर्ग्राह्या, न त्वेकोदिष्टान्तरवन्मध्याह्न-व्यापिनी। चतुर्दश्यां कथंचिद् विघ्ने तु दिनान्तरे पार्वणमेव कार्यम्। आश्विनकृष्णामावास्या रवीन्दू हस्तस्थौ चेद् गजछाया संज्ञा भवति तदा तस्यां श्राद्धं प्रशस्तम्।

इति भाद्रपदः

अथाश्विनः

आश्विनशुक्लप्रतिपन्मातामहश्राद्धेऽपराह्णव्यापिनी। संगवव्यापित्वं निर्मूलमिति सर्वनिबन्ध-कारा:। अत्र सपत्नीकानां मातामहानां देवतात्वम्। इदं च शिष्टाचारात् सपिण्डकं कार्यमिति केचित्। जीवत्पितृकस्य पिण्डरहितं तु युक्तं प्रतिभाति। इदं मलमासे न कार्यम्। इयमेव नवरात्रारम्भे औद-यिकी मुहूर्त्तमात्रापि परैव। अमायुक्ता तु निषिद्धा। उभयदिने उदयव्यापित्वे पूर्वा। परदिने प्रति-पदोऽत्यन्तासत्त्वेऽमायुक्ताऽपि पूर्वा। स्मृतिकौस्तुभकालतत्वविवेचनकारादयस्तु प्रदोषव्यापिनी प्रति-पन्नवरात्रव्रते ग्राह्या।

तत्र पूर्वदिन एव प्रदोषव्याप्तौ पूर्वा। इतरपक्षेषु तूत्तरैवेत्याहुः। प्रतिपदः पूर्वा षोडशनाड्यो निषिद्धा:। चित्रावैधृतीवर्ज्ये। असम्भवेऽनयोराद्यौ पादौ त्रयोऽशा वा वर्ज्या:। अभिजिन्मुहूर्त्ते वा कलशस्थापनं कार्यम्, परन्तु न रात्रौ। केचित्तु चित्रावैधृतीनिषेधे तद्व्यवस्थायां च मूलं चिन्त्यमेवे-त्याहुः। इदं शुक्रास्तादावपि कार्यम्। आद्यारम्भस्तु न भवति। मलमासे तु द्वितीयाद्यारम्भोऽपि भवति। [1]इदमारब्धं सूतकेऽपि कार्यम् अनारब्धे पूजामन्येन कारयेत्। वस्तुतस्तु सूतकिभि: पूजनं न कार्यं प्रतिनिधिद्वारा तु कार्यमेव। अतएव सूतके शिष्टै: पूजनं न क्रियत इत्याचारोऽपीति श्रीप्रपिता-महचरणा:। रजस्वला त्वन्येन कारयेत्।

आश्विनशुक्लपञ्चमी महाराष्ट्रेषु प्रसिद्धा। उपाङ्गललिताव्रते रात्रिव्यापिनीति केचित्।

रत्नमञ्जरी टीका

(१) आरब्धे कर्मणि मध्ये आशौचपातेऽपि न दोष इति निर्णयामृतविश्वरूपनिबन्धकार-रघुनन्दनादय इति निर्णयसिन्धुः (पृ०-१२७)

पूर्वविद्धेति [1] हेमाद्रिः । कृत्यरत्नावलीव्रतार्कादिमते त्वियं मध्याह्नव्यापिनी । उभयत्र तथात्वेऽतथात्वे वा पूर्वा । पूर्वविद्धाऽपराह्णव्यापिनीति तु कौस्तुभे । [2]आश्विनशुक्लपक्षे मूलाद्यपादे पुस्तकस्थापनम् । श्रवणाद्ये विसर्जनम् । आश्विनशुक्लसप्तम्युपवासपूजादावौदयिकी घटिकापरिमिता । ततो न्यूनत्वे तु पूर्वैवेति गौडाः । दाक्षिणात्यमते तु पूर्वा । अस्यामेव काम्यत्रिरात्रारम्भः । अत्र सावित्रीव्रतवन्न-वम्यनुरोधेन त्रिरात्रं कार्यमिति केचित् । युक्तं तु प्रतिपन्नवरात्रारम्भवत् सप्तम्यामेवारम्भणीयमिदम् ।

आश्विनशुक्लाष्टमी घटिकामात्राप्यौदयिकी ग्राह्या । सप्तमीयुक्ता तु सर्वथा त्याज्या । परदिनेऽष्टम्यभावे तु सप्तमीविद्धाऽपि ग्राह्या । यदा तु नवमीदिने सूर्योदयोत्तरमष्टमी त्रिमुहूर्त्तं द्विमुहूर्त्तं वा, परदिने च क्षयवशान्न नवमी सूर्योदयं स्पृशति तदा सप्तमीविद्धैव ग्राह्या । निर्णयदीपमते तु [3]महाष्टमी पूर्वेद्युः पूर्वाह्णव्यापित्वे पूर्वाऽन्यथा परैव । अत्रोपवासः पुत्रवतो निषिद्धः ।

आश्विनशुक्लनवमी पूर्वविद्धा । [4]निर्णयसिन्धुमते तु सायं त्रिमुहूर्त्तयोगे पूर्वाऽन्यथा निषिद्धाऽपि परविद्धैव । निर्णयदीपमते तु परदिनेऽपराह्णव्यापित्वे पराऽन्यथा पूर्वा । अत्र मूलं मृग्यम् । यदा तु नवमी अष्टमीविद्धा भूत्वा द्वितीयदिनेऽपि कियती भवति, तदा नवमीप्रयुक्तस्य पूजादेः पूर्वदिनेऽनुष्ठानेऽपि महाबलिदानमात्रं द्वितीयदिने कार्यम् । [5]नवमीप्रयुक्तं बलिदानं सर्वथा नवमीमध्ये एव कार्यम् । न तु

रत्नमञ्जरी टीका

(१) रात्रिशब्दः पूर्वविद्धावचन इति हेमाद्रिः । निर्णयसिन्धौ (पृ०-१२८)

(२) देव्याः स्थापनकालश्चोक्तो निर्णयामृते देवीपुराणे—

मूलेषु स्थापनं देव्याः पूर्वाऽऽषाढासु पूजनम् ।
उत्तरासु बलिं दद्याच्छ्रवणेन विसर्जयेत् ।। निर्णयसिन्धुः (पृ०-१२८)

(३) महाष्टम्याः कालश्चोक्तो मदनरत्ने स्मृतिसंग्रहे—

"शरन्महाष्टमी पूज्या नवमीसंयुता सदा ।
सप्तमीसंयुता नित्यं शोकसन्तापकारिणी ।"

निर्णयसिन्धुः (पृ०-१३१)

(४) निर्णयसिन्धुः (पृ०-१३२)

(५) देवीसमीपे बलिदानकालः ब्रह्मवैवर्त्ते यथा—

"नवम्यामपराह्णे तु बलिदानं प्रशस्यते ।"

पुनश्च कालिकापुराणे—"नवम्यां बलिदानं तु कर्त्तव्यं वै यथाविधि ।"

निर्णयसिन्धुः (पृ०-१३७)

दशम्याम् । द्वितीयदिने नवम्या अलाभे तु पूर्वेद्युरेव नवमीमध्ये एव कार्यम् । **मदनरत्नमते** तु बल्यादौ परा, उपवासे तु पूर्वैव । नवम्यामेव होमबल्यादिकार्यमिति **केचित्** । अष्टम्यामित्यन्ये । **अपरे** तु विकल्पं समुच्चयमाहुः । **परे** तु नवम्यामेवारभ्य नवम्यां समापयेदित्याहुः । अत्र कुलाचाराद् व्यवस्था । शिष्टास्तूभयानुग्रहायाष्टम्यामारभ्य नवम्यां समापयन्ति । अस्मत् प्रपितामह **श्रीरत्नाकरभट्टचरणास्त्व**ष्टमीहोमवचनानि लौहाभिसारिककर्मपराणि । नवमीहोमवचनानि नवरात्रव्रतविषयाण्यथवाऽष्टरात्रनवरात्रपक्षयोर्व्यवस्थया होमविधायकानीति न काप्यनुपपत्तिरित्याहुः ।

आश्विनशुक्लदशम्यां प्रातर्देवीं सम्पूज्य विसर्जयेत् । पारणा तु दशम्यां कार्यम् । नवम्यामिति **केचित्** । एतन्निर्मूलमिति **निर्णयसिन्धुमयूखादौ** । तल्लोहाभिसारिकव्रतकृन्नृपविषयमथवा यदाष्टमी त्रिमुहूर्त्ता लभ्यते, तदा पूर्वनवम्यां नवमीकृत्ये जाते द्वितीयनवम्यां पारणा विधीयते । "नवम्यां पारणं कुर्याद्दशमीमिश्रिता न चेत्" इत्यनेन तूत्तरनवम्यां नवम्यन्ते प्राप्तायाः पारणायाः बाधेन नवमीमध्य एव विधानम् । यदेवमष्टरात्रादिपक्षविषयमिति **कृत्यरत्नावल्याम्** । **दाक्षिणात्यास्तु** कुलधर्मानुसारेण नवम्यामेव पारणं कुर्वन्ति । **दीक्षिता** अप्येवम् । अत्र यथाकुलाचारं व्यवस्था । [1]पारणाहे मृतजातकसूतकप्राप्तौ होमादि ब्राह्मणद्वारा कारयित्वा पारणं कार्यमेव । सूतकान्ते ब्राह्मणभोजनदक्षिणादानादि कार्यम् । यैस्तु होमो न क्रियते तेषां तद् भवत्येवेत्युक्तम् । सधवाविधवास्त्रीभिरपि रजोदर्शनमध्ये पारणं कार्यमेव ।

इयमेव विजयदशमी । सा च नवमीश्रवणाभ्यां युक्ता ग्राह्या । यदा तु पूर्वदिने श्रवणयोगाभावः, परदिने चाल्पाऽपि तद्योगिनी, तदा दशम्याः कर्मकालव्याप्त्यभावेऽपि परैव । उभयदिने श्रवणायोगाभावे त्वपराह्णयोगवती । दिनद्वयेऽप्यपराह्णयोगे पूर्वदिने स्वल्पापराह्णे परदिनेऽधिकापराह्णे व्याप्तौ वा दिनद्वयेऽपराह्णयोगाभावे वा पूर्वैव । **विवेचनमदनरत्नादावपि** यदोत्तरैव श्रवणायुक्ता, तदैवेकादशी युक्ताऽन्यथा सर्वपक्षेषु नवमीयुक्तैवेत्युक्तम् । **मयूखकारादिमते** तु शमीपूजासीमोल्लं-

---

रत्नमञ्जरी टीका

(१) आशौचे पातेऽपि पारणायाः करणीयत्वमुक्तं यथा—

"काम्योपवासे प्रक्रान्ते त्वन्तरा मृतसूतके ।
तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितम् ॥"

इति **माधवीये कौर्मोक्तेरिति** । विष्णुवचनादपि आशौचमध्ये तत्कर्त्तव्यतावगतेः ।

निर्णयसिन्धुः (पृ०-१४०)

धनादौ नक्षत्रोदयव्यापिनी । दिनद्वये तद्‌ व्याप्तौ पूर्वा । देशान्तरयात्रा तारकोदयरूपा संध्याकाले कार्या । दिनद्वये तारकोदयकालाभावे परदिन एकादशमुहूर्त्ते सा । परदिन एकादशमुहूर्त्तव्याप्त्यभावेऽपि श्रवणयोगश्चेत्तदैव यात्रा । पुजा तु पूर्वदिन एवेति ।

आश्विनशुक्लैकादश्यां द्विदलादिकार्त्तिकव्रतारम्भः । आश्विनपौर्णमासी कोजागरव्रते प्रदोष-निशीथोभयव्यापिनी । पूर्वेद्युर्निशीथव्याप्तौ परेद्युः प्रदोषव्याप्तौ परा । पूर्वेद्युः निशीथव्याप्तौ परेद्युः प्रदोषाव्याप्तौ तु पूर्वेति **स्मार्त्ताचार्यचूडामणि**प्रभृतयः । **तिथ्यर्कमते** त्वियं निशीथव्यापिनी । प्रदोषव्यापिनीति **केचित्** । अस्यामेवाचारप्राप्तं ज्येष्ठापत्यनीराजनादि परविद्धायां कार्यमिति **कौस्तुभे** । वस्तुतस्त्वस्य नीराजनाचारस्य रात्रौ दर्शनाद्रात्रिव्यापिन्यां कार्यमिति युक्तम् ।

इयमेवाश्वयुजिकर्मणि पूर्वाह्णव्यापिनी ग्राह्या । व्रीह्याग्रयणमप्यस्यामेव यदि क्रियते तदाऽश्वयु-जिकर्मणा सह तन्त्रेण कर्त्तव्यमिति **वृत्तिकृत्** । कालान्तर एव पर्वान्तिरे शुक्लपक्षे देवनक्षत्रेवा तत्कर्त्तव्य-मिति **कृत्यरत्नावल्याम्** । इदं मलमासे न कार्यम् । आपदि तु कार्यमेव । आश्विनकृष्णचतुर्थीस्त्र्यधि-कारिक करकचतुर्थीव्रते चन्द्रोदयव्यापिनी । दिनद्वये चन्द्रोदये परा । इयमेव दुर्गादशरथोः पूजने प्रदोषव्यापिनी । उभयत्र तथात्वे परा ।

आश्विनकृष्णाष्टमी करकाभिधा **महाराष्ट्रे**ष्वन्येषु च प्रसिद्धा । सा चन्द्रोदयव्यापिनी । अस्यामेवारुणोदयव्यापिन्यां, तदभावे सूर्योदयव्यापिन्यां **माथुरमण्डलवासिभिः** राधाकुण्डे स्नानं कार्यम् । आश्विनकृष्णद्वादशी गोवत्सद्वादशीव्रते प्रदोषव्यापिनी । दिनद्वये [१]तथात्वेऽतथात्वे वा पूर्वा **स्मृतिकौस्तुभे** त्वत्र पूजायाः फलसम्बन्धात् प्राधान्यम् । सायं गवागमनकालस्तत्कालः संकल्पनक्तयोः प्रातःप्रदोषौ । कालत्रयव्याप्तिलाभे न सन्देहः । दिनद्वये एकैकाङ्गसहितप्रधानकालव्याप्तिलाभे युग्मा-दिशास्त्रान्निर्णय इत्युक्तम् । **क्वचित्तु** मध्याह्नव्यापिनी ग्राह्ये[२]त्युक्तम् । **केचित्त्विदं** व्रतं भाद्रे कुर्वन्ति ।

आश्विनकृष्णत्रयोदशी यमदीपदानेऽस्तोत्तरं घटीद्वयात्मकप्रदोषव्यापिनी । दिनद्वये तद्‌ व्याप्ता-वव्याप्तौ परा । इमामेवाश्विनशुक्लत्रयोदश्यामारभ्य गोत्रिरात्रव्रतं कार्यम् । **तिथ्यर्के** तु भाद्रशुक्ल-त्रयोदश्यामुक्तम् । **गुर्जरा**स्त्वेतदेवाद्रियन्ते । अत्र त्रयोदश्यनुरोधेन निर्णयस्त्रिरात्रस्य । इयं त्रयोदशी

रत्नमञ्जरी टीका

(१) निर्णयसिन्धुः (पृ०-१४६)

(२) निर्णयसिन्धुः (पृ०-१४६)

प्रातःकालवर्त्तिनो। दिनद्वये चेत् पूर्वा। आश्विनकृष्णचतुर्दशी नरकाख्याऽभ्यङ्गस्नाने चन्द्रोदय-व्यापिनी। दिनद्वये तद्व्याप्तौ पूर्वा। परेत्यन्ये। दिनद्वये तदव्याप्तावपि पूर्वैव। अत्र चन्द्रोदये चतुर्दश्य-सत्त्वेऽपि चतुर्दशीह्रासं पूर्वेद्युः प्रवेश्य त्रयोदशीमध्य एवाऽभ्यङ्गं कुर्यादिति **दिवोदासः**। कार्त्तिकव्रतिभिरपि तैलाभ्यङ्गोऽस्यां कार्यः। अत्र जीवत्पितृकैरपि **भीष्मतर्पणं** कार्यम्। अस्यां प्रदोषे दीपदानं कार्यम्। यदा पूर्वदिनप्रदोषे चतुर्दशी, स्नानयोग्या चोत्तरदिने. तदा पूर्वंदिनप्रदोषे दीपदानादि कृत्वा परेद्युः स्नानं कार्यम्। **स्मृतिकौस्तुभमते** त्वसत्यामपि चतुर्दश्यां स्नानादिना प्रदोषे एव दीपदानम्। अस्यामेव हनुमज्जन्म।

आश्विनामावास्या दीपाली। सा प्रदोषव्यापिनी। दिनद्वये तद्व्याप्तौ परा। उभयदिने तद्व्याप्तावर्धरात्रव्यापिनी। **दिवोदासीये** तु प्रदोषार्धरात्रव्यापिनी मुख्या। एकैकव्याप्तौ परेत्युक्तम्। यदा पूर्वेद्युरेव प्रदोषव्यापिन्यमा, श्राद्धयोग्या च परदिने, तदा पूर्वेद्युरेव प्रदोषे लक्ष्मीं सम्पूज्य दीपदानं, श्राद्धं तु परदिनेऽपराह्णे। उल्कादानमपि प्रदोषव्यापि दर्श एव। अस्यामपि प्रत्यूषेऽभ्यङ्ग-स्नानं कुर्यात्। इयमेव **दाक्षिणात्य**प्रसिद्धे केदारगौरीव्रते परा।

इत्याश्विनः

अथ कार्त्तिकः

कार्त्तिकशुक्लप्रतिपद् बलिपूजने [२]पूर्वविद्धा। गोक्रीडनादौ तु सायाह्नव्यापिनी। दिनद्वये तथात्वे परा। दिनद्वये तदभावे पूर्वैव। यत्र चन्द्रदर्शनं सा न ग्राह्या। नारीनीराजनं मङ्गलमालिके तु

रत्नमञ्जरी टीका

(१) नरकचतुर्दश्याः ग्राह्यकालः यथा निर्णयामृते भविष्योत्तरे—

"कार्त्तिके कृष्णपक्षे तु चतुर्दश्यामिनोदये।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः॥

निर्णयसिन्धुः (पृ०–१४७)

(१) कालमाधवः (पृ०–२६)

मुहूर्तमात्रायामपि द्वितीयायुतायां प्रतिपदि कार्ये । न तु स्वल्पामयुतायामपि । इयमेव तैलाभ्यङ्गे पूर्वविद्धा ।

कार्त्तिकशुक्लद्वितीया [1]यमद्वितीया । सा पूर्वदिन एवाऽपराह्णव्यापित्वे पूर्वा । पक्षान्तरेषु तु परैव । अपराह्णश्चाष्टधाविभक्तदिन पञ्चमभाग इति स्मार्त्तः । द्वेधाविभक्तदिनोत्तर भाग इति कृत्यरत्नावलीकाराः । मध्याह्नव्यापिनी पूर्वविद्धा चेति तु हेमाद्रिः । निर्णयामृतेऽपि पूर्वविद्धैव । अस्यां तिथौ स्वगृहे न भोक्तव्यम् । भगिनीहस्ताद् भोजनमावश्यकम् । भगिन्यभावे सान्निध्याभावे च कल्पितभगिनीहस्ताद् भोजनमिति हेमाद्रिः । अत्रैव शुक्लचतुर्थी नागव्रते मध्याह्नगा । कार्त्तिकशुक्लनवम्यक्षयनवमीत्युच्यते । अस्यामेव विष्णुत्रिरात्रारम्भं कृत्वा तुलसीविवाहः कार्यः ।

कार्त्तिकशुक्लैकादश्यां देवोत्थापनम् । कौस्तुभमते तु रात्रौ । अस्यां जागरणमत्यावश्कम् । अस्यामेव भीष्मपञ्चकव्रतारम्भः । कार्त्तिकशुक्लद्वादश्यां रेवतीयोगरहितायां पारणम् । अपरिहार्ययोगे रेवत्याश्चतुर्थपादं त्यजेत् । अस्यामेव चातुर्मास्यव्रतसमापनम् । कार्त्तिकशुक्लचतुर्दशी वैकुण्ठाख्या । सा विष्णुपूजने रात्रिव्यापिनी । दिनद्वये तद्व्याप्तौ निशीथप्रदोषोभयव्यापिनी । शिवपूजने त्वरुणोदयव्यापिनी । तत्पूर्वदिने चोपवासः कार्यः । केचित्तु खडतिथौ वाऽखण्डतिथौ वा पूर्वदिने कृतोपवासाः परदिनेऽरुणोदये पूजादि कुर्वन्ति । कार्त्तिकव्रतोद्यापनाङ्गभूतोपवासे तु परविद्धैवेयम् ।

कार्त्तिकपौर्णमासी त्रिपुरोत्सवाख्ये दीपदाने संध्याकालव्यापिनी । कार्त्तिककृष्णाष्टमी भैरवाष्टमी । साऽहोरात्रयुता पूर्वविद्धा । यदा तु पूर्वदिने सायाह्ने उत्तरस्मिन्नपि प्रदोषे तुल्या, तदाऽपि पूर्वैवेति । मयूखादौ रात्रिव्यापिनी । दिनद्वये तत्र सत्त्वे पूर्वेति केचित् । अन्ये तु मध्याह्नव्या-

---

रत्नमञ्जरी टीका

(१) कालविवेकः (पृ०-४०५), कृत्यरत्नाकरः पृ०-४१३)

(१) स्कन्दपुराणे काशीखण्डे मार्गशीर्षकृष्णपक्षाष्टम्यां तिथौ कालभैरवसमीपे व्रतोपवास-जागरणादिसंपादने सकलपापेभ्यः प्राणिनः मुक्ताः भवन्तीति वर्णितम् यथा—

"मार्गशीर्षसिताष्टम्यां कालभैरवसन्निधौ ।
उपोष्य जागरं कुर्वन् सर्वपापैः प्रमुच्यते ।।"

पिनीमाहुः । **कौस्तुभमते** तु प्रदोषव्यापिनी । पारणं तु यामत्रयमध्येऽष्टम्यन्तश्चेत्तदन्तेऽन्यथा प्रातरेव ।

इति कार्त्तिकः

अथ मार्गशीर्षः

मार्गशुक्लपञ्चम्यपि नागपञ्चमी । सा श्रावणशुक्लपञ्चमीवत् । अत्रैव शुक्लषष्ठी चम्पाख्या परविद्धा । इयमेव [१] रविवारवैधृतियुक्ता चम्पाभिधा । **मदनरत्ने** तु विशाखाभौमयोगेन चम्पाभिधेत्युक्तम् । इय योगवशेन पूर्वा परा वा । अस्यामेव रविवारे शततारास्थे चन्द्रे विश्वेश्वरदर्शनं कार्यम् । इयमुक्तयोगयुक्ता पूर्वा परा वा । योगाभावे सप्तमीयुक्ता । मार्गशुक्लचतुर्दशी कुलधर्मव्रतादावुत्तरा । पौर्णमास्यत्र प्रत्यवरोहणे श्रवणाकर्मवत् । अस्यां दत्तात्रेयोत्पत्तिः । इयं पूर्वविद्धा ग्राह्येति वदन्ति । प्रदोषव्यापिनीति **निर्णयसिन्धौ** ।

मार्गशीर्षादिमासचतुष्टयकृष्णाष्टमीष्वष्टकाश्राद्धम् । तत्पूर्वसप्तमीषु पूर्वेद्युः श्राद्धम् । तदुत्तरनवमीषु चान्वष्टकाश्राद्धम् । भाद्रकृष्णेऽपि क्वचिदुक्ता । अशक्तस्य माघकृष्णाष्टमी । तत्रापि पूर्वेद्युरान्वष्टक्ययोरसम्भवेऽष्टकामात्रमपि । मार्गादिकृष्णपक्षाणामेवामावास्या अपि चतस्रोऽष्टकाः । शाखाभेदाद् व्यवस्था । अत्राष्टम्यपराह्णव्यापिनी । पूर्वेद्युरान्वष्टक्ययोश्चाष्टम्यनुरोधेन निर्णयः । मार्गादिषु मलमासपाते तत्राष्टका न कार्या ।

इति मार्गशीर्षः

अथ पौषः

पौषकृष्णचतुर्थ्यां संकष्टचतुर्थीव्रतारम्भ इति केचित् । इयं चन्द्रोदयव्यापिनी । पौषकृष्ण-

---

रत्नमञ्जरी टीका

(१) चम्पाषष्ठ्याः योगविशेषाः उच्यन्ते ब्रह्माण्डपुराणे मल्लारिमाहात्म्ये—

"मार्गे भाद्रपदे शुक्ला षष्ठी वैधृतिसंयुता ।
रविवारेण संयुक्ता सा चम्पेतीह कीर्त्तिता ।।

निर्णयसिन्धुः (पृ०-१५६)

चतुर्दश्यां यमतर्पणम् । पौषपौर्णमास्युत्तरा माघशुक्लप्रतिपत् पूर्वतनामार्कश्रवणव्यतीपातैर्युक्ताऽर्धो-दय इति **त्रिस्थलीसेतौ भट्टाः ।** पौषमाघमासामावास्याद्वयमपि तथा योगवदर्धोदय इति **मदनरत्ने । स्मृतिकौस्तुभकृता** तु शुक्लादिमासेन माघकृत्यमध्येऽमावास्यायामर्धोदयकृत्य-मुक्तम् । ततश्च शिवरात्र्युत्तरामावास्येति तदाशयो भाति । विशेषनिर्णयस्याकरणात् ।

वस्तुतस्तु —"माघामायां व्यतीपात आदित्ये विष्णुदैवते ।"
अर्द्धोदयं तदित्याहुरि" ति

हेमाद्रिमदनरत्नधृत स्कान्दवचने स्पष्टं माघामा प्रतीयते । सा च शुक्लादिमासेन शिवरात्र्युत्तरामा तथा—

"अमार्कपातश्रवणैर्युक्ता चेत् पुष्यमाघयोः ।
अर्द्धोदयस्स विज्ञेय" इति

महाभारतीयनिर्णयामृतधृतवचने पुष्यमाघयोरिति श्रवणात् पुष्यमाघयोर्मध्यतना पौषपौर्ण-मास्युत्तरैवामा ग्राह्येति **श्रीभट्टचरणोक्तमेव** साधु ।

न च मदनरत्नाभिप्रायेणात्र द्वन्द्वसमासो युक्तः । केवल माघामाप्रतिपादकवाक्यान्तरवत् पुष्यामाप्रतिपादकवाक्यान्तराभावे स्वतन्त्रपुष्यामाप्रतिपादकस्मृतिमूलभूतस्वतन्त्रश्रुतिकल्पनापेक्षया लाघवात् पूर्वोक्तसमासाश्रयेण माघामाया एव तत्कालकल्पनौचित्यात् । एतदग्रे च दिवैव योगः

रत्नमञ्जरी टीका

(१) अर्धोदययोगं वर्णयति कृत्यकौमुद्यां बृहस्पति :—

"मृगार्केन्दुक्षये पाते वारार्कश्रवणे यदि ।
अर्धोदयः स विज्ञेयः सहस्रार्कग्रहैः समः ।।
अर्कश्रुतिव्यतीपाते युक्ता सा माघपुष्ययोः ।
असावर्धोदयो योगः कोट्यर्कग्रहसन्निभः ।।
अमार्कपातश्रवणैर्युक्ता चेत् पुष्यमाघयोः ।
अर्धोदयः स विज्ञेयः कोटिसन्निहितं फलम् ।।

स्कन्दपुराणवचनमप्युपस्थापयति गदाधरः कालसारे (पृ०—४६५)

"माघामायां व्यतीपाते वारेऽर्के श्रवणं यदि ।
अर्धोदयः स विज्ञेयः कोटिसूर्यग्र हैः समः ।।"

शस्तोऽयं न तु रात्रौ कदाचनेति **निर्णयामृतधृतमन्यैरपि** नवीनैर्धृतमप्यन्यमहानिबन्धेष्वलिखनान्निर्मूलम् । समूलत्वेऽपि "त्रियामा रात्रि" रिति वचनादाद्यन्तयोर्यामार्द्धयो योगसम्भवे भवत्येवार्द्धोदयः । [१]**निर्णयसिन्धावप्येवम् । केचित्तु** रवेरर्धबिम्बोदये सप्रशस्त इति । समाख्याबला "दर्द्धोदयो रवेर्यस्मात्तस्मादर्धोदयः स्मृतः" इति **स्कान्दाच्चेत्याहुः** । यत्त्व"र्धोदयः स विज्ञेय" इत्यस्याग्रे "किञ्चिदूनो महोदय" इत्यर्धं क्वचित् पठितं, तदन्यग्रन्थेष्वसंवादान्निर्मूलम् ।

"अमाद्यभागे पातान्ते श्रुतेर्मध्येऽर्कवासरे ।
अर्धोदयोऽर्द्धोदितेऽर्के सोमे स स्यान्महोदयः ।।"

इति मूलं **केचिद्** वदन्ति ।

इति पौषः

अथ माघः

माघशुक्लचतुर्थी तिलचतुर्थी । कुन्दाख्या च प्रदोषव्यापिनी । दिनद्वये सत्त्वे पूर्वा । अत्रैव पञ्चमी वसन्तोत्सवे माधवमते पूर्वा । **हेमाद्रिमते** परा । माघशुक्लसप्तमी रथसप्तमी । साऽरुणोदयव्यापिनी । दिनद्वये सत्त्वे पूर्वा । यदा पूर्वेऽह्नि घटिकाद्वयं षष्ठी, सप्तमी च परेद्युः क्षयवशादरुणोदयात् पूर्वं समाप्यते, तदा तत्र षष्ठ्यां सप्तमीक्षयप्रवेश्या[२]रुणोदये स्नानादि कार्यम् ।

गर्ग :—"षष्ठी च सप्तमीयोगे वारश्चेदंशुमालिनः ।
योगोऽयं पद्मको नाम सहस्रार्कग्रहैः समः ।।"

रत्नमञ्जरी टीका

(१) निर्णयसिन्धुः (पृ०–१५७)

(२) अरुणोदयकाले स्नानं विशिनष्टि कालविवेके (पृ०–१०२)

स्मृतिसमुच्चयकारः—

"सूर्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां स्नानं तत्र महाफलम् ।।"

सर्वेष्वपि मासेष्वविशेषादयं योगो बोद्धव्य इति निर्णयसिन्धौ । अत्रैवाष्टम्यां भीष्मतर्पणम् । पुत्रकामस्तु श्राद्धं कुर्यात् । माघशुक्लद्वादशी भीमद्वादशी । सा पूर्वयुता । **माघीपूर्णिमा परा । माघकृष्णाष्टमी** सीताष्टमी ।

माघकृष्णचतुर्दशी शिवरात्रिः । सा द्वितीययामान्त्य तृतीययामाद्य घटीद्वयरूपनिशीथव्यापिनी ।[1] **माधवमते** तु प्रदोषनिशीथोभयव्यापिनी । **निर्णयामृतमते** तु प्रदोषव्यापिन्येव । दिनद्वये निशीथव्याप्तौ पूर्वेति **हेमाद्रिमदनरत्नौ** गौडाश्च । परेति **माधवमयूखतिथ्यर्कं निर्णयसिन्धुकारादयः ।** यदा तु परदिने स्वल्पार्धरात्रव्याप्तिः पूर्वदिने च सम्पूर्णा तदा पूर्वैव । यदा पूर्वेद्युर्निशीथे परेद्युश्च प्रदोषे तदा पूर्वैव । **निर्णयामृतमते** परा । दिनद्वये निशी॰ व्याप्तौ परैव । पारणं तु तिथिमध्ये एवेति [4]**निर्णयसिन्धौ । मदनरत्नमते** तु दिवातिथिसमाप्तौ तिथ्यन्तेऽन्यथा तन्मध्य एव । **विवेचनमते** तु शक्तास्तिथ्यन्तेऽशक्तस्तु तिथिमध्य एव । **माधवस्तु** यामत्रयादर्वाक् समाप्तौ तिथ्यन्ते तदूर्ध्वगत्वे तु प्रातस्तिथिमध्य एवेत्याह । [5]**दीपिकायां** तु व्रततिथेरन्ते निशीथेऽपि वाऽश्नीयादित्युक्तम् । यदा तु पारणदिने स्वल्पा चतुर्दशी तदा जलपारणं कृत्वाऽमा श्राद्धं कार्यम् । **मासशिवरात्रिस्तु** बहुरात्रव्यापिनी । साम्ये पूर्वा । **निर्णयसिन्धुकौस्तुभमदनरत्नमयूखादौ** तु प्रदोषनिशीथोभयव्याप्तावस्यान्ते निर्णयः कृतः ।

इति माघः

रत्नमञ्जरी टीका

(१) दिनद्वये निशीथव्याप्तौ तदव्याप्तौ च प्रदोषव्याप्तिर्नियामिका । तथा दिनद्वयेऽपि प्रदोषव्याप्तौ तदव्याप्तौ च निशीथव्याप्तिर्नियामिका । एकैकस्मिन् एकैकव्याप्तौ जयायोगो नियामकः ।। कालमाधवः (पृ०–२९७)

(२) निर्णयामृते सर्वापि शिवरात्रिः प्रदोषव्यापिन्येव । अर्धरात्रवाक्यानि कैमुतिकन्यायेन प्रदोषस्तावकानीत्युक्तम् ।। निर्णयसिन्धुः (पृ०–१९५)

(३) निर्णयसिन्धुः (पृ०–१९५)

(४) निर्णयसिन्धुः (पृ०-१९६)

(५) निर्णयसिन्धुः (पृ०-१९६)

(६) निर्णयसिन्धुः (पृ०-१९६)

अथ फाल्गुनः

फाल्गुनशुक्लाष्टमी बहुलाष्टमी। सा प्रदोषव्यापिनी। दिनद्वये सत्त्वेऽसत्त्वे वा परैव। फाल्गुनीपौर्णिमा होलिका। सा प्रदोषव्यापिनी भद्रारहिता ग्राह्या। निर्णयामृतमते तु सायाह्नव्यापिनी। दिनद्वये प्रदोषव्याप्तौ परा। यदा तु पूर्वदिने प्रदोषे भद्रा, परदिने चास्तात् पूर्वमेव पञ्चदशी समाप्यते, तदा पूर्वेद्युरेव रात्रौ सूर्योदयात् पूर्वं भद्रान्तं प्रतीक्ष्य होलिका दीपनीया। यदा तु पूर्वत्रप्रदोषव्याप्त्यभावस्तत् सत्त्वे वा भद्रारहितः कालः सूर्योदयात् पूर्वं न लभ्यते, उत्तरदिने च सूर्यास्तात् पूर्वमेव पूर्णिमा समाप्ता, तदा [१]भद्रापुच्छे पूर्वदिने होलिकादीपनं कार्यम्।

यदा त्वस्मिन्नेव विषये उत्तरपौर्णमासी सार्धयामत्रयमिता, ततोऽधिका वा, प्रतिपच्चोत्तरदिने वृद्धिगामिनी, तदा पूर्वदिनं परित्यज्य परदिने प्रदोषव्यापिन्यां प्रतिपद्येव तत्, न तु पूर्वरात्रौ विष्टिपुच्छे। निर्णयसिन्धौ त्वत्र पूर्वदिन एव भद्रामुखं विहाय होलिका। शिष्टाचारोऽप्येवमेवेत्युक्तम्। चतुर्दश्यनन्तरप्रवृत्तपूर्णिमया सहोदयिकपूर्णिमामेकीकृत्य यावत् परिमिता पूर्णिमा भवति, तामष्टप्रहरान् कृत्वा तृतीयचतुर्थप्रहरान्तिमाद्यघटीत्रितयपञ्चके क्रमात् पुच्छमुखसंज्ञे ज्ञेये। या तूत्तरदिने प्रदोषैकदेशेऽस्ति, पूर्वरात्रौ च भद्रारहिता नैव लभ्यते, सा सुतरामुत्तरैव।

यदा तु प्रतिपत् क्षयो, दिनद्वयेऽपि पूर्णिमायाः प्रदोषस्पर्शाभावः, उक्तसमये भद्रापुच्छालाभो वा तदा सर्वत्रैव भद्रायामपि कार्यं, न तु परत्र सायाह्नादौ। यदा पूर्वदिनरात्रिः सर्वा भद्रायुक्ता, उत्तरदिन प्रदोषश्च पौर्णमासी शेषयुक्तोऽपि ग्रस्तचन्द्रोदयाद्रात्रिप्रथमघटिकायामेव वा चन्द्रग्रासाद् ग्रहणाक्रान्तस्तदा सूर्यास्तोत्तरभद्रासत्त्वेऽपि पूर्वदिन एव कार्यमिति कश्चित्। वस्तुतस्तु परदिनप्रदोषे पौर्णमासीसत्त्वे कर्मकालस्पर्शे गौणकालग्रहणे मानाभावाद् भद्राभावाच्च ग्रहणकाल एव स्नात्वा होलिका कार्या। फाल्गुनस्य मलत्वे शुद्धे होला कार्या। अत्रापि दोलोत्सवः। फाल्गुनकृष्णप्रति-

---

रत्नमञ्जरी टीका

(१) भद्रायां होलिकायाः करणे प्राशस्त्यं यथा नारदेन—

"प्रदोषव्यापिनी चेत् स्याद्यदा पूर्वदिने तदा।
भद्रामुखं वर्जयित्वा होलिकायाः प्रदीपनम्॥"

भद्रापुच्छस्य लक्षणं चोक्तं धर्मसिन्धौ (पृ०-२६६)—

"पूर्णिमायां भद्रायास्तृतीयपादान्ते घटीत्रयं पुच्छम्। चतुर्थपादाद्यघटीपञ्चकं मुखम्। तिथेश्चतुःषष्ठीघटीमितत्वे पूर्णिमाया एकविंशतिघटिकोत्तरं पुच्छम्। चतुर्विंशतिघटिकोत्तरं मुखम्।

पद्मसन्तोत्सवे औदयिकी। दिनद्वये तथात्वे पूर्वेति केचित्। निर्णयामृतमते तु पूर्वविद्धा। होलिका-दीपनाव्यवहितोत्तरदिनं ग्राह्यमिति तु युक्तम्। अस्यामेव पूर्वविद्धायां कौस्तुभमते गोविन्ददोलोत्सवः। अत्र तैलाभ्यङ्गो नित्यः। फाल्गुनकृष्णद्वितीया काममहोत्सवे पूर्वविद्धा। फाल्गुनकृष्णाष्टमीमारभ्य चतुर्षु मासेषु शीतलाव्रतम्।

इति फाल्गुनः

इति विशेषतिथिनिर्णयः

अथ ग्रहणम्

तत्र [१]सूर्यग्रहणं यस्मिन् यामे तस्मात् पूर्वं यामचतुष्टयं न भुञ्जीत। चन्द्रग्रहणे यामत्रयम्। बालवृद्धातुराणां पूर्वं याममात्रं निषिद्धम्। [२] सूर्यस्य ग्रस्तास्ते पूर्वेऽह्नि उत्तररात्रौ च न भोक्तव्यम्। [३] चन्द्रग्रस्ताऽस्ते उत्तरेऽह्नि पूर्वरात्रौ च न भोक्तव्यम्। परेद्युरूदयं दृष्ट्वा भुञ्जीत। चन्द्रग्रस्तोदये पूर्वेऽह्नि न भुञ्जीत। पुत्रीतरेषां त्रिरात्रं ग्रहणान्तं ग्रहणदिवस एव वा उपवासो महाफलः। केचित्तु ग्रहणपूर्वदिनेऽप्युपवासमाहुः। पुत्रवद् गृहस्थस्तु पापक्षयकामोऽपि ग्रहणोपवासं न कुर्यात्। रवेर्ग्रस्तास्ते पुत्रिणः प्रहरद्वयं हित्वा भोजनोपवास इति हेमाद्रिः। सोऽपि नाश्नीयादिति माधवः।

रत्नमञ्जरी टीका

(१) वृद्धगौतमः—"सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयम्।
चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना॥"
हे० काल० (पृ०–३८१)

(२) "नाद्यात् सूर्यग्रहात् पूर्वमह्नि सायं शशिग्रहात्।
ग्रहकाले च नाश्नीयात् स्नात्वाऽश्नीयाद् विमुक्तयोः॥
मुक्ते शशिनि भुञ्जीत यदि स्यान्न महानिशा।
स्नात्वा दृष्ट्वा परेऽह्न्यद्याद् ग्रस्तास्तमितयोस्तयोः॥
कृत्यकल्पतरु (नियतकालकाण्ड पृ०–३०६/३१०)

(३) "चन्द्रार्कोपरागे नाश्नीयादविमुक्तयोरस्तंगतयोर्दृष्ट्वा स्नात्वा परेऽहनि।"
विष्णुधर्मसूत्रम् (६८/१–३)

चन्द्रग्रस्तास्ते उत्तरदिने संध्याहोमादौ न दोषः । ग्रस्यमाने स्नानम् । ग्रस्ते होमः सुरार्चनम् । मुच्यमाने दानम् । मुक्ते स्नानम् । ग्रहणे स्नानमाद्यन्तयोः सचैलममन्त्रकं सर्वेषामावश्यकम् । मुक्तिस्नानमेव सचैलमिति मदनरत्ने । ग्रहणकाले ततः प्राग्वा पक्वमन्नं तत् पश्चादपि वर्जयेत् । ग्रहणे [१]श्राद्धमपि नित्यं काम्यं च । तच्चामेन हेम्ना वा । चन्द्रग्रहणनिमित्तकं स्नानदानश्राद्धादि रात्रावपि भवति । ग्रहणनिमित्तश्राद्धेनैवामासंक्रान्त्यादि निमित्तकानां सिद्धिः । एतच्चापिण्डकं [२]त्रिपिण्डकं वा कार्यम् । ग्रहणे किञ्चिद्दानं नित्यं काम्यं च । नित्यत्वादेव मलमासेऽपि भवति । ग्रहणकाले जननमरणनिमित्ताशौचसत्त्वेऽपि स्नानश्राद्धदानादिमन्त्रदीक्षापुरश्चरणादि सर्वं स्मार्त्तकर्म च भवत्येव । रजस्वलाऽपि पात्रान्तरिततोयेन स्नायात् । ग्रहणे सति तन्निमित्ताशौचं सर्वेषां जायतेऽतः स्नानाच्छ्राद्धाद्यधिकारः । ग्रहणदिने परान्नं न भोक्तव्यम् । ग्रहणान्तरितस्य पूर्वसंकल्पितद्रव्यस्य द्वैगुण्यं भवतीति शिष्टाः । अत्र मूलं चिन्त्यमिति निर्णयसिन्धौ । ग्रहणकाले भोजने प्राजापत्यम् । वेधकाले ग्रस्तास्तोत्तरनिषिद्धकाले च भोजने त्रिरात्रोपवासः । स्त्रीबालवृद्धादीनां तत्तदर्द्धम् । समस्तमङ्गलकार्येषु सम्पूर्णग्रासे त्रयोदशीतो दिननवकं वर्ज्यमिति केचित् । चन्द्रग्रहे द्वादश्यादि तृतीयान्तं, सूर्यग्रहे एकादश्यादि चतुर्थ्यन्तं वर्ज्यमित्यपरे । खण्डग्रहे तूभयतश्चतुर्दश्यादिदिनत्रयम् । तयोर्ग्रस्तास्ते पूर्वं दिनत्रयम् । ग्रस्तोदये पश्चात्तनं दिनत्रयम् । ग्रहणं जन्मचतुर्थाष्टमद्वादशराशिषु निषिद्धम् । सूर्यग्रहणे तदादिसप्तदिनपर्यन्तं वा रामगोपालाद्यागमदीक्षा कार्या, न चन्द्रग्रहणे । ग्रहणे रहस्यपुरश्चरणं कार्यम् । तच्च ग्रस्तोदये ग्रस्तास्ते च न भवति । ग्रहणदिने प्रत्याब्दिके सत्यामेन हेम्ना वा तत् कार्यम् ।

इति ग्रहणम्

रत्नमञ्जरी टीका

(१) ग्रहणे अपिण्डश्राद्धं नियमयति कृत्यकौमुद्यां मार्कण्डेय :—

"ग्रहणे च व्यतीपाते नवशस्यसमागमे ।
युगादौ षडशीत्याञ्च गृहाच्छादने एव च ।
नित्यश्राद्धे च संक्रान्त्यामपिण्डं श्राद्धमिष्यते ॥"

(२) ग्रहणकाले त्रिपिण्डकश्राद्धं वर्णितं यमस्मृतौ (श्लो-७३)

"ग्रहोपरागसंक्रान्तौ पर्वोत्सवमहालये ।
निर्वपेत् त्रीन् नरः पिण्डानेकमेव मृताऽहनि ॥"

अथ संक्रान्तिः

तत्र सर्वसंक्रान्तिषु प्रागूर्ध्वं च त्रिंशत् त्रिंशन्नाड्यः पुण्या इति **माधवः**। पञ्चदश पञ्चदशेति **हेमाद्रिः**। इदमेव युक्तम्। मेषे प्रागूर्ध्वं च दशनाडिकाः पुण्यकालः (१) वृषे पूर्वा षोडश (२) मिथुने परा षोडश (३) कर्के पूर्वास्त्रिंशत् (४) सिंहे पूर्वा षोडश (५) कन्यायां परा षोडश (६) तुलायां प्रागूर्ध्वा दश (७) वृश्चिके पूर्वा षोडश (८) धनुषि परा षोडश (९) मकरे हेमाद्रिमते पराश्चत्वारिंशत् माधवमते विंशतिः (१०) कुम्भे पूर्वा षोडश (११) मीने परा षोडश (१२) इति ' दिनसंक्रान्तौ।

सायं संक्रान्तौ तु यत्रोत्तरः पुण्यकालस्तत्रापि तावत् परिमितः पूर्वमेव। यत्र प्रागुक्तस्तत्रापि प्रातःसंक्रान्तावुदयानन्तरमेव ज्ञेयः। निशीथादर्वाक् चेत् पूर्वदिनं पुण्यम्। अनन्तरं चेत् परदिनम्। निशीथ एव चेद् दिनद्वयं पुण्यम्। रात्रौ निशीथे प्रभाते वा कर्कसंक्रान्तौ पूर्वदिनं पुण्यम्। रात्रौ निशीथे प्रदोषे वा मकरसंक्रान्तौ परदिनम्। एवमयनव्यतिरिक्तरात्रिसंक्रान्तीषु यथायथं पूर्वोत्तरदिनार्द्धस्य। अयने च पूर्वोत्तरदिनयोः पुण्यत्वे सत्यपि पूर्वदिनस्यान्त्याः पञ्चघटिकाः उत्तरदिनस्याद्याश्च पञ्चघटिका यथायथं पुण्यतमाः। **नारदस्तु** विशेषमाह–

"अर्धास्तमन संध्या हि घटिकात्रयसम्मिता।
तथैवार्धोदयात् प्रातर्घटिकात्रयसम्मिता॥
सूर्यस्योदयसंध्यायां यदि याम्यायनं भवेत्।
तदोदयादहः पुण्यं पूर्वाह्णः पूर्वतो यदि॥
सूर्यास्तमनसंध्यायां यदि याम्यायनं भवेत्।
तदहः पुण्यकालः स्यात् परतश्चेत् परेऽह्नि॥" इति।

रत्नमञ्जरी टीका

(१) ग्रहणकाले भोजने प्रायश्चित्तमुक्तं माधवीये कात्यायनेन—

"चन्द्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति।
तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुद्ध्यति॥ निर्णयसिन्धुः (पृ०–४५)

(२) दिनसंक्रान्तौ पुण्यकालः कमलाकरेण प्रदर्शितः (निर्णयसिन्धुः पृ०-३)

यथा "प्रागूर्ध्वा दशपूर्वतः षडवनिस्तद्वत् पराः पूर्वतः–
स्त्रिंशत् षोडश पूर्वतोऽथ परतः पूर्वा पराः स्युर्दश।
पूर्वा षोडशचोत्तरा ऋतुभुवः पश्चात् खवेदाः पुनः,
पूर्वा षोडश चोत्तरा पुनरथ पुण्यास्तु मेषादितः॥

अस्य श्लोकस्यार्थोऽपि तत्रैव वर्णितः।

एवं [१]रात्रौ संक्रमे दिवैव स्नानादिकर्त्तव्यता प्रतिपादिता। केचित्तु रात्रौ संक्रमे तन्निमित्तस्नानादिकं रात्रौ कर्त्तव्यमिति कथयन्ति। अत्र च मिथोविरोधाद् गत्यन्तरासम्भवेन विकल्पोऽङ्गीकार्यः। स च तत्तद्देशशिष्टाचाराद् व्यवस्थितो द्रष्टव्यः। अयनव्यतिरिक्तदशसंक्रान्तिषु रात्रौ स्नानश्राद्धादि न कार्यम्। तयोस्तु रात्रावपि तदिति केचित्। आसु [२]स्नानदानतपःश्राद्धहोमजपदेवतापूजोपवासादिनैकैकं महाफलम्।

अत्र [३]स्नानाकरणे दोषोऽस्ति। पापक्षयादिकामस्य संक्रान्तिनिमित्ताहोरात्रोपवासोऽयनविषुवयोस्त्रिरात्रोपवासश्च महाफलः। अशक्तावयनविषुवयोरप्यहोरात्रोपवास एव कार्यः। पुत्रवता गृहस्थेन तु सकामेनापि संक्रान्तिनिमित्तोपवासो न कार्यः। अत्र विहितं [४]श्राद्धं नित्यं पिण्डरहितञ्च। एकोपवासपक्षे संक्रान्तिदिने उपवासो, दानादि तु पुण्यकालदिने [५]इत्याचार्यचूडामणिः। विधिलाघवात् पुण्यकालदिने

रत्नमञ्जरी टीका

(१) रात्रिसंक्रमणे स्नानदानादीनां कालः प्रतिपादितः यथा

राजमार्त्तण्डे—"निशार्धे चलिते भानौ निरंशे च दिनद्वयम्।
पूर्वेऽहनि च कर्त्तव्यं स्नानदानजपादिकम्॥"

(२) "रवेः संक्रमणं राशौ संक्रान्तिरिति कथ्यते।
स्नानदानतपःश्राद्धहोमादिषु महाफला॥" हेमाद्रिः (कालखण्डः पृ०-४१०)

(३) संक्रान्तौ स्नानाकरणे दोषः प्रतिपादितः समयमयूखे (पृ०-१४३)

शातातपः—"रविसंक्रमणे प्राप्ते न स्नायाद् यस्तु मानवः।
सप्तजन्मातिरोगी स्यान्निर्धनश्चापि जायते॥"

(४) संक्रान्तिषु अपिण्डं श्राद्धं प्रतिपादितं मत्स्यपुराणे—

"अयनद्वितये श्राद्धं विषुवद्वितये तथा।
संक्रान्तिषु च कर्त्तव्यं पिण्डनिर्वपणादृते॥"

पुनश्च— 'ग्रहोपरागसंक्रान्तौ पर्वोत्सवमहालये।
निर्वपेत् त्रीन् नरः पिण्डानेकत्रैव मृताहनि॥ इति

यमवचनात् पिण्डविधिनिषेधयोरेकत्रानुपपत्तावाहिताग्नेः पितुर्न च "पिण्डैरेव ब्राह्मणानपि भोजयेदि" ति नियमात् साग्निना सपिण्डं निरग्निना च पिण्डरहितमिति केचित्। षोडशिग्रहणाग्रहणवद् विकल्प इत्यपरे। अतोऽत्र संक्रान्त्यादिषु पिण्डदानविधिनिषेधवचनयोः प्रामाण्यात् क्वचित् पिण्डदानं न कर्त्तव्यं, क्वचिच्च पिण्डदानं कर्त्तव्यमिति उदितानुदितहोमवद् वा विकल्पः कल्पनीय इति।

(५) निर्णयसिन्धुः (पृ०-४)

एवोभयमिति [१]वृद्धाः । संक्रान्तिप्रयुक्तयात्रादिनिषेधेऽपि स्नानादिविहितकाला एव तारतम्येन ग्राह्याः । अयनविषुवप्रयुक्तानध्यायस्तु दिवा संक्रमे रात्रिद्वयम् । [२]रात्रिसंक्रमे दिनद्वयम् ।

अथ पुण्यतिथयः

"अमावास्या तु [३]सोमेन सप्तमी [४]भानुना तथा ।
चतुर्थी [५]भूमिपुत्रेण अष्टमी बुधसंयुता ॥
चतस्रस्तिथयो पुण्याः सूर्यग्रहणसन्निभाः ।
स्नानं दानं तथा श्राद्धं तत्सर्वं चाक्षयं भवेत् ।
[६]तुलामकरमेषेषु प्रातःस्नायी सदा भवेत् ॥" इति

कार्त्तिकमाघवैशाखस्नानानि तानि मलमासादौ गुर्वास्तादावपि कार्याणि । यदा वैशाखादौ मलमासपातस्तदा मासद्वयं स्नानदानादि ॥

इति पौण्डरीकयाजि विश्वेश्वरविरचितं निर्णयकौतुकं समाप्तम्

—×—

रत्नमञ्जरी टीका

(१) निर्णयसिन्धुः (पृ–४)

(२) रात्रिसंक्रमणे पुण्यकालश्च कालविवेके (पृ०–३८३) वसिष्ठः यथा—

"सम्पूर्णे चेदर्धरात्रे रविसंक्रमणं भवेत् ।
प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ ॥"

(३) सोमेन—सोमवारेण ।

(४) भानुना—रविवारेण ।

(५) भूमिपुत्रेण—मङ्गलवारेण ।

(६) तुलामकरमेषेषु प्रातःस्नानस्य प्राशस्त्यं कालसारे (पृ०–२१) राजमार्त्तण्डे (पृ०–१२५) ऽपि प्रतिपादितं यथा—

"तुलामकरमेषेषु प्रातःस्नानं प्रशस्यते ।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ॥"

इति श्रीजयकृष्णमिश्र विरचिता निर्णयकौतुकटीका रत्नमञ्जरी समाप्ता

—×—

Some people gauge time in terms of price and value while some, in terms of its auspiciousness. Ancient Indian people generally preferred the latter one. All time is not price-worthy always. If one runs after time keeping in view of its preciousness he sometimes has to confront with disappointment. According to our ancient Indian scholars, time commands a kind of potential effect and they, with a microscopic observation, pointed out in different texts of astrology, and prescribed minutes, hours, days and months in which moments of auspiciousness exist. Any work or undertaking, started on an auspicious moment, after deliberately waiting for it for many days, produces very successful results. Awaiting the auspicious moment is regarded better than "not to wait for time"

The present work "निर्णयकौतुकम्" deals with the fifteen tithis and twelve months and the festivals falling in these periods is establshed authentically in it.

The text carries an original commentary, written by its editor, Dr. Jayakrishna Mishra himself. It renders a great help in understanding the text and also its references elsewhere. Dr. Mishra who has done his doctorate in Dharmaśastra commands very good knowledge over his subject. I congratulate him to have come forward to contribute fresh material on the subject of his research, Dharmaśastra and I wish him very success in communicating the salient features of Dharmaśastra to those who choose the subject.

Goparaju Rama